समग्र शिक्षा
Samagra Shiksha
సమగ్ర శిక్ష

LEAP
LEARNING EXCELLENCE IN ANDHRA PRADESH

Department of School Education
Government of Andhra Pradesh

F



संस्कृतकौमुदी

सप्तमी कक्ष्या

(प्राच्यपाठशालानाम्)

7


Free distribution by Government of Andhra Pradesh



U313F2

State Council of Educational Research and Training - A.P

© SCERT



భారత రాజ్యాంగం పౌర విధులు

(ఎ) రాజ్యాంగమునకు బద్ధుడై వుండుట, దాని ఆదర్శాలను, సంస్థలను, జాతీయ పతాకమును, జాతీయ గీతమును గౌరవించుట;

(బి) జాతీయ స్వాతంత్ర్య పోరాటమునకు స్ఫూర్తినిచ్చిన ఉన్నతాదర్శములను మనసయందు ఉంచుకొని వాటిని అనుసరించుట;

(సి) భారత సార్వభౌమత్వం, ఐక్యత, అఖండతను సమర్థించుట మరియు సంరక్షించుట.

(డి) దేశమును రక్షించుట మరియు కోరినపుడు జాతికి సేవ చేయుట

(ఇ) భారత ప్రజల మధ్య మత, భాష, ప్రాంతీయ, వర్గ వైవిధ్యములను అధిగమించి, సామరస్యమును, సోదర భావమును, పెంపొందించుట, స్త్రీల గౌరవం తగ్గించు ఆచారములను విడనాడుట;

(ఎఫ్) మన ఉమ్మడి సంస్కృతినీ, సుసంపన్న సంప్రదాయాలను గౌరవించి రక్షించుట.

(జి) అడవులు, సరస్సులు, నదులు, అడవి జంతువులతో సహా ప్రాకృతిక పరిసరాలను కాపాడి అభివృద్ధి చేయుట మరియు సమస్త జీవుల యెడల కరుణార్ద్రత కలిగి వుండుట,

(హెచ్) శాస్త్రీయ దృక్పథాన్ని, మానవతావాదాన్ని, జిజ్ఞాసను సంస్కరణ తత్వాన్ని పెంపొందించుకొనటం

(అ) ప్రజల ఆస్తిని సంరక్షించుట, హింసను విడనాడుట

(2) ప్రయత్నాలు, సాధనల ఉన్నతస్థాయిలను నిరంతరం అందుకొనునట్లుగా వైయక్తిక, సమిష్టి కార్య రంగాలన్నింటిలో శ్రేష్టత కోసం, కృషి చేయుట ప్రాథమిక కర్తవ్యమై వుండవలెను.

12) ఆరు నుండి పద్నాలుగు సంవత్సరముల వయస్సు కలిగిన బాలునికి లేదా బాలికకు తల్లి తండ్రి లేదా సంరక్షకునిగావున్న వ్యక్తి తనబిడ్డ లేదా సందర్భానుసారము తన సంరక్షితునికి విద్యార్జనకు అవకాశములు కల్పించవలెను.

భారతరాజ్యాంగం

విభాగం IV ఎ (అధికరణం 51 A)

ఉచిత నిర్బంధ ప్రాథమిక విద్యాహక్కు చట్టం RTE, 2009

6 నుండి 14 సంవత్సరముల పిల్లలందరికి ఉచిత నిర్భంద ఎలిమెంటరీ విద్యనందించడానికి ఉద్దేశించబడినవి. ఇది ఏప్రిల్ 1, 2010 నుండి అమల్లోకి వచ్చింది.

చట్టంలోని ముఖ్యాంశాలు

* పిల్లలందరికి అందుబాటులో పాఠశాలలను ఏర్పాటుచేయాలి.
* పాఠశాలలకు మౌలిక వసతులను కల్పించాలి.
* పిల్లలందరిని వయస్సుకు తగిన తరగతిలో చేర్పించాలి.
* వయస్సుకు తగ్గ తరగతిలో చేర్చిన తర్వాత తోటి వారితో సమానంగా ఉంచటానికి ప్రత్యేకశిక్షణ ఇప్పించాలి.
* ప్రత్యేక అవసరాలు కల్గిన పిల్లలకు సాధారణ పిల్లలతోపాటు విద్యకొనసాగించడానికి తగిన వసతులు ఏర్పాట్లు చేయాలి,
* బడిలో చేర్చుకోడానికి ఎలాంటి పరీక్షలు నిర్వహించరాదు. ఎటువంటి రుషము, చార్జీలు వసూలు చేయరాదు.
* బడిలో చేరిన పిల్లల పేరు తీసివేయడం, అదే తరగతిలో కొనసాగించడం చేయరాదు.
* పాఠశాలలో చేరిన ఏ విద్యార్థినీ ప్రాథమిక విద్య పూర్తయ్యే వరకు ఏ తరగతిలోను నిలుపుదల చేయకూడదు లేదా పాఠశాల. నుండి బహిష్కరించకూడదు.
* పిల్లల్ని శారీరకంగా, మానసికంగా హింసించరాదు.
* వయస్సు నిర్ధారణ పత్రం, ఇతర దృవీకరణ పత్రాలు లేవనే కారణం చేత పిల్లలకు ఐదిలో ప్రవేశాన్ని నిరాకరించరాదు.
* తగిన అర్హతలున్న వారిని మాత్రమే ఉపాధ్యాయులుగా నియమించాలి.
* పిల్లలు విద్దేశించిన సామర్థ్యాలు సాధించేలా బోధనాభ్యసనం, మూల్యాంకనం ఉండాలి..
* ఎలిమెంటరీ విద్య పూర్తయ్యేవరకు పిల్లలకు ఎలాంటి బోర్డు పరీక్షలు నిర్వహించరాదు.
* పద్నాలుగు సంవత్సరాలు పూర్తయినప్పటికినీ, ఎలిమెంటరీ విద్య పూర్తయ్యేవరకు పాఠశాలలో పిల్లలు కొనసాగవచ్చును.
* బలహీన వర్గాలరు, ప్రతికూల పరిస్థితులను ఎదుర్కొంటున్న బృందాలకు చెందిన పిల్లలు ఏ విధమైన వివక్షతకు గురికాకుండా చూడాలి.
* రాజ్యాంగంలో పొందుపరిచిన విలువలకు అనుగుణంగా, విద్యార్థులను భయం, ఆందోళనకు గురిచేయని రీతిలో వారి సర్వతోముఖాభివృద్ధికి తోడ్పడే పాఠ్యప్రణాళిక రూపొందించాలి.

© NCERT not to be republished

संस्कृतकौमुदी

सप्तमी कक्ष्या

संयुक्तपाठ्यक्रमः

7th Sanskrit Reader (Oriental Course)

© Government of Andhra Pradesh, Amaravati

First Published 2013

New Impressions 2014, 2015, 2016, 2017, 2024, 2025, 2026

DISCLAIMER

Any form of copying of the content, information and illustrations from this text book is a punishable offence.

All rights reserved

No part of this publication may be reproduced, stored in a retrieval system, or transmitted, in any form or by any means without the prior permission in writing of the publisher, nor be otherwise circulated in any form of binding or cover other than that in which it is published. Without a similar condition including this condition being imposed on the subsequent purchaser. The copyright holder of this book is the Commissioner of School Education, Amaravati, Andhra Pradesh.

This book has been printed on 70 GSM, SS Maplitho, Title Page 220 GSM, and White Art Card

Published by Samagra Shiksha & SCERT - Government of Andhra Pradesh, Amaravati

AP SCERT

మా తెలుగుతల్లి

– శంకరంబాడి సుందరాచారి



మా తెలుగుతల్లికి మల్లెపూదండ
మా కన్నతల్లికి మంగళారతులు
కడుపులో బంగారు కనుచూపులో కరుణ
చిరునవ్వులో సిరులు దొరలించు మా తల్లి
గలగలా గోదారి కదలిపోతుంటేను
బిరబిరా కృష్ణమ్మ పరుగులిడుతుంటేను
బంగారు పంటలే పండుతాయి
మురిపాల ముత్యాలు దొరలుతాయి
అమరావతీ నగర అపురూప శిల్పాలు
త్యాగయ్య గొంతులో తారాడు నాదాలు
తిక్కయ్య కలములో తియ్యందనాలు
నిత్యమై, నిఖిలమై నిలిచియుండేదాక
రుద్రమ్మ భుజశక్తి, మల్లమ్మ పతిభక్తి
తిమ్మరుసు ధీయుక్తి, కృష్ణరాయల కీర్తి
మా చెవుల రింగుమని మారుమ్రోగేదాక
నీ ఆటలే ఆడుతాం – నీ పాటలే పాడుతాం
జై తెలుగుతల్లీ ! జై తెలుగుతల్లీ! జై తెలుగుతల్లీ!

APSCERT

Printed in India
at the A.P. Govt., Textbook Press,
Amaravati, Andhra Pradesh.

वन्दे मातरम्



वन्दे मातरं, वन्दे मातरम्
सुजलां सुफलां मलयजशीतलाम्
सस्यश्यामलां मातरं वन्दे मातरम्
शुभ्रज्योत्स्नापुलकितयामिनीम्
फुल्लकुसुमितद्रुमदलशोभिनीम्
सुहासिनीं सुमधुरभाषिणीम्
सुखदां वरदां मातरं वन्दे मातरम् ।

- बंकिंचन्द्र छटर्जी

జాతీయ జెండా రూపకర్త



పింగళి వెంకయ్యగారు 1876 ఆగస్టు 2న కృష్ణా జిల్లాలోని భట్లపెనుమర్రు గ్రామంలో జన్మించారు. భారత స్వాతంత్ర్యోద్యమ కాలంలో దేశానికి తగిన జాతీయ జెండా అవసరాన్ని గుర్తించిన పింగళి వెంకయ్య గారు అనేక నమూనాలను రూపొందించారు. 1921లో విజయవాడలో జరిగిన భారత జాతీయ కాంగ్రెస్ సమావేశంలో మహాత్మాగాంధీకి ఆయన జెండా నమూనాను సమర్పించారు. గాంధీజీ సూచనల మేరకు జెండాలో మార్పులు చేసి, త్రివర్ణ పతాకాన్ని రూపొందించారు.

APSCERT

राष्ट्रियशिक्षानीतिः 2020 (NEP 2020)

भारतस्य नूतना शिक्षानीतिः २०२० समग्रा, सुलभा, विद्यार्थिकेन्द्रीकृतविद्याव्यवस्थां निर्माति च। इयं नीतिः सामर्थ्याधारिताभ्यसनं तथैव अनुभवात्मकविधीन् सुस्पष्टं व्यक्तीकरोति। अनया विद्या आकर्षणीया सार्थका च भवति। जातीयविद्यानीतिः २०२० प्रस्तुत २१ शताब्द्याः नैपुण्यानामुपरि दृष्टिं प्रसारयति।

- विमर्शनात्मकालोचनम्
- सर्जनात्मकता
- समाचारविनिमयक्षमता
- समस्यापरिष्काराश्च अस्यां मुख्यविषयाः।

इयं नीतिः स्वीयजीवनाभ्यसनम् आविष्कारान् सांकेतिकाधारितबोधनाविधीन् प्रोत्साहयति। अस्याः विधेः लक्ष्यम् - सम्मिलितविद्या तथैव भविष्यत्कालानुगुणं विद्याव्यवस्थानिर्माणमेव। इयं नीतिः अत्यन्तवेगेन परिवर्तमाने प्रपञ्चे प्रत्येकं विद्यार्थिनं विजयप्राप्तये शक्तिवन्तं करोति। इयं नीतिः भारतदेशविद्याव्यवस्थायां बृहत् परिवर्तनानयने स्वीयपदानि व्यवस्थापयति।

జాతీయ విద్యా విధానం 2020

జాతీయ విద్యా విధానం 2020 సమగ్రమైనది, సౌలభ్యమైనది మరియు విద్యార్థి–కేంద్రీకృత విద్యా వ్యవస్థను నిర్మిస్తుంది. ఇది సామర్థ్యాధారిత అభ్యసనం మరియు అనుభవాత్మక విధానాలను బలంగా నొక్కి చెబుతుంది, దీనివల్ల విద్య ఆకర్షణీయంగా మరియు అర్థవంతంగా ఉంటుంది. జాతీయ విద్యా విధానం 2020 ప్రస్తుత 21వ శతాబ్దపు నైపుణ్యాలపై దృష్టి సారిస్తుంది.

- విమర్శనాత్మక ఆలోచన
- సృజనాత్మకత
- సమాచారం
- సమస్య పరిష్కారం ముఖ్యమైనవి.

ఇది నిజ జీవిత అభ్యసనం ఆవిష్కరణలు, సాంకేతికతాధారిత బోధనా విధానాలను ప్రోత్సహిస్తుంది. స్థూలంగా, ఈ విధానం సమ్మిళిత విద్యను మరియు భవిష్యత్తుకు సిద్ధమైన విద్యా వ్యవస్థ నిర్మాణమే లక్ష్యంగా పెట్టుకుంది. ఇది వేగంగా మారుతున్న ప్రపంచంలో ప్రతి విద్యార్థి విజయవంతం కావడాన్ని శక్తివంతం చేస్తుంది. ఇది భారతదేశ విద్యా రంగంలో ఒక పెద్ద మార్పు తీసుకొచ్చే దిశగా అడుగులు వేస్తోంది.

APSCERT

राष्ट्रियगीतम्

- रवीन्द्रनाथ् ठागूर्

जनगणमन अधिनायक जय हे !
भारतभाग्यविधाता !
पञ्जाब सिन्धु गुजरात मराठा,
द्राविड उत्कल वङ्ग !
विन्ध्य हिमाचल यमुना गङ्गा
उच्चलजलधितरङ्ग !
तव शुभ नामे जागे !
तव शुभ आशिष मागे !
गाहे तव जय गाथा !
जनगणमङ्गलदायक जय हे
भारतभाग्यविधाता !
जय हे ! जय हे ! जय हे !
जय जय जय जय हे !

प्रतिज्ञा

- पैडिमर्रि वेंकट सुब्बाराव्

भारतदेशः मम मातृभूमिः । भारतीयास्सर्वे मम सहोदराः ।

अहं मम देशं प्रीणामि । सुसम्पन्ना, बहुविधा भारतीया सांस्कृतिकसम्पत् मम गर्वकारणम् । तस्याः योग्यजनो भवितुं सर्वदा अहं परिश्रमं करोमि ।

मम मातापितरौ, उपाध्यायान्, ज्येष्ठान् सर्वान् च पूजयामि। सर्वैः सह सगौरवं व्यवहरामि ।

मम देशस्य विषये, प्रजानां विषये सेवानिरतिं भजामि । जन्तूनां विषये दयालुः भवामि इति च प्रतिज्ञां करोमि ।

सर्वेषां श्रेयोऽभिवृद्धयः एव मम आनन्दस्य कारणम् ।

AP SCERT

विषयसूची

पाठस्य नाम	प्रक्रिया	मासः	पृष्ठसङ्ख्या
संसिद्धतापाठाः		जून्	1 - 30
१. भवतुभारतम्	(गीतम्)	जुलै	31 - 42
२. अरण्यम्	(श्लोकाः)	जुलै	43 - 54
३. साहसम्	(वास्तविकघटना)	अगष्ट्	55 - 68
४. कार्यदक्षता	(श्लोकाः)	सेप्टेम्बर्	69 - 82
५. तुलसीवृक्षकम्	(निबन्धः)	अक्टोबर्	83 - 94
६. लोकसेवनम्	(गीतम्)	नवम्बर्	95 - 106
७. नाडीजङ्घः	(कथा)	डिसेम्बर्	107 - 120
८. भगवद्गीता	(श्लोकाः)	जनवरी	121 - 130
९. वनेचरः	(निबन्धः)	फिब्रवरी	131 - 140
१०. सुभाषितानि	(श्लोकाः)	-	141 - 152
पुनश्चरणम्		मार्चि-एप्रियल्	
अनुबन्धः			
शब्दाः			153 - 156
धातवः			157 - 159
पदकोशः			160 - 166
क्रियापदकोशः			167 - 168

U2U5C9

Teacher corner

H6H6P1

Student corner

☞ अध्यापकः 'सुभाषितानि' इति पाठे विद्यमानेषु श्लोकेषु प्रतिमासम् एकैकं श्लोकं छात्रैः अभ्यासयेत्।

संसिद्धतायाम् अन्तर्गत सम्भाषणांशाः, पाठान्ते विद्यमानसम्भाषणांशाः मूल्याङ्कनाय दीयन्ते।

APSCERT

छात्रैः साधयितव्यानि अभ्यसनफलितानि

I. भावावगमनम् - प्रतिस्पन्दनम्

शृण्वन्तु, विचिन्त्य वदन्तु

- ❖ गीतानि, श्लोकाः, सम्भाषणानि, कथाः इत्यादीन् विषयान् श्रुत्वा छात्राः अवगच्छेयुः। तेषां भावान् मातृभाषया वक्तुं शक्नुयुः।
- ❖ संस्कृतेन पृष्टान् प्रश्नान् छात्राः अवगच्छेयुः। तेषां योग्यानि समाधानानि संस्कृतेन वदेयुः।
  ज्ञातान् विषयान् अधिकृत्य संस्कृतेन वदेयुः।
- ❖ लघूनि संस्कृतभाषणानि कर्तुं शक्नुयुः।

पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु

- ❖ श्लोकाः, कथाः, गीतानि, सम्भाषणानि, आत्मकथाः, निबन्धाः, लेखाः इत्यादिसंस्कृतविषयान् अवगच्छेयुः धाराप्रवाहतया पठेयुश्च ।
- ❖ पाठितस्य विषयस्य आधारेण दत्तानां प्रश्नानां समाधानानि लिखेयुः। पठनावगमनस्थानि कृत्यानि दोषान् विना कुर्युः।
- ❖ अनुच्छेदगद्यांशानां प्रश्नानां समाधानानि स्वयं लिखत्वा विषयानवगच्छेयुः।

II. भावव्यक्तीकरणम् सर्जनात्मकता

- ❖ ज्ञातान् दृष्टान् श्रुतान् च विषयान् उद्दिश्य स्वप्रतिस्पन्दनं संस्कृतेन लेखितुं शक्नुयुः।
- ❖ बहुसमाधानवतां प्रश्नानां संस्कृतेन उत्तराणि लिखेयुः।
- ❖ आत्मानं तत्तत्सन्दर्भे ऊहित्वा अहं तत्र किं कर्तुं शक्नुयामिति विचिन्त्य प्रत्येकमपि छात्रः संस्कृतेन स्वानुभवं लेखितुं शक्नुयात् ।
- ❖ प्रक्रियापरिवर्तनं कर्तुं शक्नुयुः।
- ❖ कथाः, गीतानि, कविताः स्मरेयुः स्वयं रचयेयुः च।
- ❖ लेखानां लेखनसामर्थ्यं प्राप्नुयुः । चित्राणां लेखनं, तेषां वर्णनं च स्वयं कर्तुं शक्नुयुः।

III. भाषांशाः

पदजालाभिवृद्धिः

- ❖ पाठ्यमानेषु अथवा श्रूयमाणेषु विषयेषु स्थितानां नूतनपदानां सन्दर्भानुगुणम् अर्थं ग्रहीतुं शक्नुयुः।
- ❖ ज्ञातपदानामाधारेण स्वयं वाक्यानि लेखितुं शक्नुयुः।
- ❖ समानार्थकपदानि विरुद्धार्थकपदानि च ज्ञातुं शक्नुयुः।

व्याकरणांशाः

- ❖ भाषाभागान् व्याकरणांशान् च ज्ञातुं शक्नुयुः। विभक्तीः अवगच्छेयुः । तासां प्रामुख्यं च जानीयुः। विना दोषं तासां प्रयोगसामर्थ्यञ्च प्राप्नुयुः ।
- ❖ वाक्यभेदान् जानीयुः। स्वयं प्रयोक्तुं शक्नुयुः।
- ❖ लिङ्गभेदान् विना दोषं प्रयुञ्जीरन् ।
- ❖ कालानुसारं लकाराणां पुरुषाणां च प्रयोगे समर्थाः भवेयुः ।
- ❖ सन्धीनां संयोजने, विघटने, समासानां विग्रहवाक्यानां च प्रयोगे समर्थाः भवेयुः।

AP SCERT

पाठ्यप्रणालिकालक्ष्याणि

भाषा न केवलं शब्दानां व्याकणनियमानां वा समुहः अपि तु भावप्रकटीकरणस्य चिन्तनविकासस्य च प्रमुखं साधनम् ।

१. मौखिकभाषाकौशलानां विकासः ।

१-१ विविधसन्दर्भेषु सरलं सार्थकं च सम्भाषणसामर्थ्यम् ।

१-२ पठितपाठानां मुख्यविषयाणां संक्षेपेण प्रकटीकरणम् ।

१.३ मौखिकप्रदर्शनेषु अतिथि - आह्वानेषु लघुभाषणेषु कक्ष्याचर्चासु च सहभागित्वम् ।

२. पठनं तथा अवबोधनम्

२.१ विविधानां रचनानां (गद्यपद्यकवितादीनाम्) अवबोधनाय कल्पनाशक्तेः ऊह्यमानस्य दर्शनकरणस्य च कौशलानां प्रयोगः ।

२.२ मुख्यविषयाणां ग्रहणं तथा सारांशलेखनम् ।

३. लेखनकौशलस्य विकासः

३.१ वाक्यानां क्रमशः लेखनं शीर्षक - उपशीर्षक - परिच्छेदानां निर्माणकौशलम् ।

३.२ पठितविषयाणां स्वकीयावबोधनेन चिन्तनेन च स्पष्टतया लेखनम् ।

३.३ उपलब्धसूचनाभिः भित्तिपत्राणां निमन्त्रणपत्राणां सरलकवितानां कथानां च लेखनम् ।

३.४ लेखने व्याकरणस्य समुचितवाक्यरचनायाः च प्रयोगः ।

४. शब्दसम्पदः अभिवर्धनम्

४.१ नूतनशब्दानां अर्थचर्चा तथा विविधसाहित्यपठनेन शब्दसम्पदः विकासः ।

४.२ विविधविषयाणां श्रवणेन पठनेन च शब्दज्ञानस्य वर्धनम् ।

५. पठनरुचेः विकासः

५.१ गृहे पठनार्थं ग्रन्थालयात् नियमेन पुस्तकानां स्वीकरणम् ।

५.२ ग्रन्थालये पुस्तकानां पठने आसक्तिप्रदर्शनम् ।

APSCERT

संस्कृतप्रार्थना

पठामि संस्कृतं नित्यं
वदामि संस्कृतं सदा।
ध्यायामि संस्कृतं सम्यक्
वन्दे संस्कृतमातरम्।।१।।

संस्कृतस्य प्रसाराय
नैजं सर्वं ददाम्यहम्।
संस्कृतस्य सदा भक्तो
वन्दे संस्कृतमातरम्।।२।।

संस्कृतस्य कृते जीवन्
संस्कृतस्य कृते यजन्।
आत्मानमाहुतं मन्ये
वन्दे संस्कृतमातरम्।।३।।



अ	आ	इ	ई	उ	ऊ	ऋ	ॠ	ए	ऐ

AP SCERT

मम नाम, भवतः नाम, भवत्याः नाम



मम नाम सुरेशः
भवतः नाम किम्?





मम नाम विद्या
भवत्याः नाम किम्?



अभ्यासः



.... गणेशः
....?





.... विद्या
....?



एषः - सः - कः, एषा - सा - का, एतत् - तत् - किम्





एषः कः? एषः बालकः



सः कः?



सः बालकः





.... ? ....?





....





एषा का? एषा बालिका



सा का?



सा बालिका





.... ? .... ? .... ?



.... ?





एतत् किम्? एतत् पुस्तकम्



तत् किम् ?



तत् पुस्तकम्





.... ? .... ?



.... ?



.... ?

ओ	औ	अं	अः		क	ख	ग	घ	ङ

AP SCERT

आम् - न - अस्ति - नास्ति



किम् एतत् फलं वा?

आम्



किम् एतत् फलं वा?

न



आकाशे चन्द्रः अस्ति




आकाशे चन्द्रः नास्ति

षष्ठीविभक्तिः


बालकस्य - बालिकायाः - भवनस्य







१. बालकः	- बालकस्य	१. बालिका	- बालिकायाः	१. पुस्तकम्	- पुस्तकस्य
२. रामः	-	२. माला	-	२. पुष्पम्	- .....



१. भारतदेशः	भरतदेशस्य	राजधानी	देहली
२. आन्धप्रदेशः	आन्ध्रप्रदेशस्य	राजधानी	अमरावती।
३. केरला	केरलायाः	राजधानी	तिरुवनन्तपुरम्।


आवश्यकम् - मास्तु - पर्याप्तम् - धन्यवादाः - स्वागतम्



अन्नम् आवश्यकम्



अन्नम् पर्याप्तम्



शीतलपानीयम् मास्तु



धन्यवादाः




स्वागतम्

च	छ	ज	झ	ञ	ट	ठ	ड	ढ	ण



बहुवचनपदानि


बालकः



बालकाः


बालिका


बालिकाः


पत्रम्


पत्राणि





एते के?

एते बालकाः



ते के?

ते बालकाः।









एताः काः?

एताः बालिकाः





एतानि पत्राणि।




तानि पत्राणि।




त	थ	द	ध	न	प	फ	ब	भ	म

AP SCERT

आवश्यकम् - मास्तु - पर्याप्तम् - धन्यवादाः - स्वागतम्



अन्नम् आवश्यकम्



अन्नम् पर्याप्तम्



फलम् आवश्यकम्



धन्यवादाः




शीतलपानीयम् मास्तु



स्वागतम्



स्वागतम्



य	र	ल	व	श	ष	स	ह	क्ष	त्र

समयः



पञ्चवादनम्

3.00

.....

11.00

.....



पञ्चाधिकपञ्चवादनम्

8.05

.....

9.05

.....



दशाधिकपञ्चवादनम्

6.10

.....

7.10

.....



सपाद - एकवादनम्

2.15

.....

5.15

.....



विंशत्यधिकपञ्चवादनम्

6.20

.....

7.20

.....



पञ्चविंशत्यधिकपञ्चवादनम्

6.25

.....

7.25

.....



सार्ध - अष्टवादनम्

10.30

.....

11.30

.....




पादोनपञ्चवादनम्

4.45

.....

8.45

.....




दशोनपञ्चवादनम्

8.50

.....

2.50

.....



पञ्चोनपञ्चवादनम्

7.55

.....

9.55


.....

गुणकाक्षराणि

स्वराः	अ	आ	इ	ई	उ	ऊ	ऋ	ॠ	ए	ऐ	ओ	औ	अं	अः
मात्राः	-	ा	ि	ी	ु	ू	ृ	ॄ	े	ै	ो	ौ	ं	ः
क्														
ख्														
ग्														
घ्														
ङ्														
च्														
छ्														

© NCERT not to be republished

पुरतः, पृष्टतः, वामतः, दक्षिणतः, उपरि, अधः।



१. आसन्दस्य पुरतः का अस्ति?

२. आसन्दस्य पृष्टतः का अस्ति?

३. आसन्दस्य दक्षिणतः कः अस्ति?

४. आसन्दस्य वामतः कः अस्ति?

५. आसन्दस्य उपरि किम् अस्ति?

६. आसन्दस्य अधः कः अस्ति?

लिङ्गभेदज्ञापनम्

संस्कृतभाषायाम् अन्यभाषाणामपेक्षया पदानां लिङ्गनिर्धारणं भवति।

पुंलिङ्गपदानि

यस्य शब्दस्य अन्ते ः भवति, तत् पदं प्रायशः पुंलिङ्गपदं भवति।

बालकः कूपः शिशुः विद्यालयः

स्त्रीलिङ्गपदानि

यस्य शब्दस्य अन्ते ा, ी ू भवति, तत् पदं प्रायशः स्त्रीलिङ्गपदं भवति।

बालिका कूपी सोदरी पाठशाला

नपुंसकलिङ्गपदानि

यस्य शब्दस्य अन्ते ् भवति तत् पदं प्रायशः नपुंसकलिङ्गपदं भवति।

गृहम् क्रीडाङ्गणम् युतकम् वातायनम्

AP SCERT

गुणकाक्षराणि

स्वराः	अ	आ	इ	ई	उ	ऊ	ऋ	ॠ	ए	ऐ	ओ	औ	अं	अः
मात्राः	-	ा	ि	ी	ु	ू	ृ	ॄ	े	ै	ो	ौ	ं	ः
ज्														
झ्														
ञ्														
ट्														
ठ्														
ड्														
ढ्														

© SCERT


भवन्तः , भवत्यः



भवान् वैद्यः



भवन्तः वैद्याः






..... अध्यापकः



....




भवती वैद्या



भवत्यः वैद्याः



..... महिला



....

अहम् - वयम्




अहं गायिका



वयं गायिकाः



अहं क्रीडाकारः



वयं क्रीडाकाराः

APSCERT

गुणकाक्षराणि

स्वराः	अ	आ	इ	ई	उ	ऊ	ऋ	ॠ	ए	ऐ	ओ	औ	अं	अः
मात्राः	-	ा	ि	ी	ु	ू	ृ	ॄ	े	ै	ो	ौ	ं	ः
ण्														
त्														
थ्														
द्														
ध्														
न्														
प्														

© SCERT

अद्य - श्वः - ह्यः

प्रपरह्यः	-	रविवासरः
परह्यः	-	सोमवासरः
ह्यः	-	मङ्गलवासरः
अद्य	-	बुधवासरः
श्वः	-	गुरुवासरः
परश्वः	-	शुक्रवासरः
प्रपरश्वः	-	शनिवासरः

क्रियापदानां बहुवचनरूपाणि

प्रथमपुरुषः



बालकः क्रीडति



बालकाः क्रीडन्ति




बालिका क्रीडति



बालिकाः क्रीडन्ति

उत्तमपुरुषः




अहं चालयामि



वयं चालयामः



अहं पचामि



वयं पचामः

गुणकाक्षराणि

स्वराः	अ	आ	इ	ई	उ	ऊ	ऋ	ॠ	ए	ऐ	ओ	औ	अं	अः
मात्राः	-	ा	ि	ी	ु	ू	ृ	ॄ	े	ै	ो	ौ	ं	ः
फ्														
ब्														
भ्														
म्														
य्														
र्														
ल्														

© NCERT not to be republished



एकत्र



नाणकं अस्ति।



नाणकानि एकत्र सन्ति।

कदा



सूर्योदयः कदा भवति?

सूर्योदयः प्रातः काले भवति।

गुणकाक्षराणि

स्वराः	मात्राः	क	ख	ग	घ	ङ	च	छ	ज
अ	◌								
आ	◌ा								
इ	◌ि								
ई	◌ी								
उ	◌ु								
ऊ	◌ू								
ऋ	◌ृ								
ॠ	◌ॄ								
ऌ	◌ॢ								
ॡ	◌ॣ								
ए	◌े								
ऐ	◌ै								
ओ	◌ो								
औ	◌ौ								
अं	◌ं								
अः	◌ः								

AP SCERT

सम्भाषणम्

सप्तककाराः

कः




एषः कः?

एषः बालकः।



एषः कः?

एषः गजः।



एषः कः?

एषः ऋषिः।

कदा



चन्द्रः कदा उदेति?

चन्द्रः रात्रौ उदेति।



सूर्यः कदा उदेति?

सूर्यः प्रातः उदेति।

कथम्



वृषभः कथम् अस्ति?

वृषभः कृष्णवर्णः अस्ति।



रक्तवृन्ताकः कथम् अस्ति?

रक्तवृन्ताकः रक्तवर्णम् अस्ति



आम्रमं कथम् अस्ति?

आम्रमं पीतम् अस्ति

कुत्र

वायुः कुत्र अस्ति?

वायुः सर्वत्र अस्ति।



नाणकानि कुत्र सन्ति?

नाणकानि एकत्र सन्ति।



फलानि कुत्र सन्ति?

फलानि एकत्र सन्ति।

किमर्थम्



बालकः किमर्थम् पठति?

बालकः ज्ञानार्थं पठति।



माता किमर्थम् पचति?

माता भोजनार्थं पचति।



बालिका किमर्थम् क्रीडति?

बालिका आनन्दार्थं क्रीडति।

कीदृशः



मल्लः कीदृशः अस्ति?

मल्लः बलिष्ठः अस्ति।



पत्रम् कीदृशम् अस्ति?

पत्रम् हरितम् अस्ति।

कति



कति गदाः सन्ति?

चतस्रः गदाः सन्ति।



कति घण्टाः सन्ति?

चतस्रः घण्टाः सन्ति।



कति सन्ति?

चतस्रः द्रोण्यः सन्ति।

© NCERT

संयुक्ताक्षराणि - द्वित्वाक्षराणि

एकः हल्वर्णः तत्समानहल् वर्णेन सह योजनम् एव द्वित्वाक्षरम् इति कथ्यते।
एकः हल्वर्णः अन्येन हल् वर्णेन सह योजनम् एव संयुक्ताक्षरान् इति उच्यते।

क् + य = क्य	वाक्यम्	युक्तः	पक्षः	सुक्ष्म्	चक्रम्	क्क - हिक्का
.....	.....	.....	.....	.....	.....	.....
.....	.....	.....	.....	.....	.....	.....
ख् + य = ख्य	विख्यातिः					ख्ख
.....	.....	.....	.....	.....	.....	.....
.....	.....	.....	.....	.....	.....	.....
ग् + य = ग्य	योग्यः	लग्नम्	युग्मम्	दुग्धः	अग्रजः	ग्ग दिग्गजः
.....	.....	.....	.....	.....	.....	.....
.....	.....	.....	.....	.....	.....	.....
घ् + य = घ्य	अर्घ्यम्	विघ्नः	श्लाघ्यम्		घ्राणः	घ्घ
.....	.....	.....	.....	.....	.....	.....
.....	.....	.....	.....	.....	.....	.....
ङ् + य = ङ्य	वाङ्मयम्	अङ्गुली	अङ्गणम्	लवङ्गः	किङ्किणी	ङ्ङ
.....	.....	.....	.....	.....	.....	.....
.....	.....	.....	.....	.....	.....	.....
च् + य = च्य	च्यवनः	परिच्छेदः	उच्छ्वासः	साच्कः	वच्मि	च्च सच्चरित्र
.....	.....	.....	.....	.....	.....	.....
.....	.....	.....	.....	.....	.....	.....
छ् + य = छ्य	कृच्छ्रम्					छ्छ
.....	.....	.....	.....	.....	.....	.....
.....	.....	.....	.....	.....	.....	.....
ज् + य = ज्य	ज्यायान्				वज्रः	ज्ज सज्जनः
.....	.....	.....	.....	.....	.....	.....
.....	.....	.....	.....	.....	.....	.....

AP SCERT

यदि - तर्हि



१. यदि सम्यक् पठति तर्हि उत्तम अङ्कान् प्राप्नोति।

१. यदि शीघ्रं गच्छति, तर्हि रेलयानं लभते।




यथा - तथा



यथा राजा तथा प्रजाः

यथा भवान् व्यवहरति तथा जनाः व्यवहरन्ति




मम अध्ययन वस्तूनि



१. उत्पूठिका	५. सान्द्रमुद्रिका	९. मापिका
२. आसन्दः	६. सङ्गणकयन्त्रम्	१०. लेखनपुस्तकम्
३. दीर्घफलकम्	७. अङ्कनी	
४. लेखिनी	८. तीक्ष्णदा	

भोजनसम्बन्धिशब्दाः




1	-	चषकः	10	-	क्वथितम्	19	-	मरीचिकाचूर्णः
2	-	स्थालिका	11	-	चित्रान्नम्	20	-	गुडः
3	-	दर्वी	12	-	वटकाः			
4	-	पात्रम्	13	-	पर्पटाः			
5	-	चमसः	14	-	तक्रमरीचिकाः			
6	-	ओदनम्	15	-	दधि			
7	-	सूपः	16	-	पायसः			
8	-	अवलेहः	17	-	पयोहिमम्			
9	-	व्यञ्जनम्	18	-	लवणम्			

झ् + य = झ्य						झ्झ
.....	.....	.....	.....	.....	.....	.....
.....	.....	.....	.....	.....	.....	.....
ञ् + य = ञ्य	वञ्चना	सञ्चयः	पिञ्छः	वाञ्छा	झञ्झावातः	ञ्ञ
.....	.....	.....	.....	.....	.....	.....
.....	.....	.....	.....	.....	.....	.....
ट् + य = ट्य	कापट्यम्	खट्वा	उष्ट्रः			ट्ट पट्टिका
.....	.....	.....	.....	.....	.....	.....
.....	.....	.....	.....	.....	.....	.....
ठ् + य = ठ्य	शाठ्यम्	पाठ्यम्				ट्ठ विट्ठलः
.....	.....	.....	.....	.....	.....	.....
.....	.....	.....	.....	.....	.....	.....
ड् + य = ड्य	कुड्यम्	खड्गः	षड्युचयः			ड्ड उड्डयनम्
.....	.....	.....	.....	.....	.....	.....
.....	.....	.....	.....	.....	.....	.....
ढ् + य = ढ्य	गुणाढ्यः					ढ्ढ
.....	.....	.....	.....	.....	.....	.....
.....	.....	.....	.....	.....	.....	.....
ण् + य = ण्य	पुण्यम्	कण्ठः	पण्डितः	षण्मुखः	अण्वायुधः	ण्ण विषण्णः
.....	.....	.....	.....	.....	.....	.....
.....	.....	.....	.....	.....	.....	.....
त् + य = त्य	सत्यम्	रत्नम्	सत्त्वम्	उत्थानम्	मित्रम्	त्त मृत्तिका
.....	.....	.....	.....	.....	.....	.....
.....	.....	.....	.....	.....	.....	.....
थ् + य = थ्य	पथ्यम्	सामर्थ्यम्				थ्था
.....	.....	.....	.....	.....	.....	.....
.....	.....	.....	.....	.....	.....	.....
द् + य = द्य	पद्मम्	पद्यम्	द्वौ शुद्धः	द्रव्यम्		द्द उद्देश्यम्
.....	.....	.....	.....	.....	.....	.....
.....	.....	.....	.....	.....	.....	.....

AP SCERT

भूतकालबहुवचनानि



१. अहं छात्रः आसम् - अहं पठितवान्।

२. अहं स्नातकः आसम् - अहं प्रमाणपत्रं स्वीकृतवान्।

३. अहं अध्यापकः आसम् - अहं पाठितवान्।

४. अहं जननायकः आसम् - अहं उद्यमं कृतवान्।

५. अहं लेखकः आसम् - अहं पुस्तकानि लिखितवान्।

ए.व	ब.व	ए.व	ब.व
पठितवान्	पठितवन्तः	गतवान्	गतवन्तः
पठितवती	पठितवत्यः	गतवती	गतवत्यः
लिखितवान्	लिखितवन्तः	स्नातवान्	स्नातवन्तः
लिखितवती	लिखितवत्यः	सनातवती	स्नातवत्यः
पीतवान्	पीतवन्तः	खादितवान्	खादितवन्तः
पीतवती	पीतवत्यः	खादितवती	खादितवत्यः

ध् + य = ध्य	अध्ययनम्	अध्वानम्	पद्धति			ध्ध
.....	.....	.....	.....	.....	.....	.....
.....	.....	.....	.....	.....	.....	.....
न् + य = न्य	न्यायम्	अनन्तः	जन्म	अन्वयः		न्न अन्नम्
.....	.....	.....	.....	.....	.....	.....
.....	.....	.....	.....	.....	.....	.....
प् + य = प्य	स्वप्नः	सप्त	विप्लवः	गोप्यम्	विप्रः	प्प
.....	.....	.....	.....	.....	.....	.....
.....	.....	.....	.....	.....	.....	.....
फ् + य = फ्य						फ्फ
.....	.....	.....	.....	.....	.....	.....
.....	.....	.....	.....	.....	.....	.....
ब् + य = ब्य	जब्जम्	अब्धिः	शब्दः			ब्ब
.....	.....	.....	.....	.....	.....	.....
.....	.....	.....	.....	.....	.....	.....
भ् + य = भ्य	अभ्युदयः				अभ्रम्	भ्भ
.....	.....	.....	.....	.....	.....	.....
.....	.....	.....	.....	.....	.....	.....
म् + य = म्य	अम्बा	आम्लम्	पम्पा	आम्नायः	आम्रम्	म्म अम्मयम्
.....	.....	.....	.....	.....	.....	.....
.....	.....	.....	.....	.....	.....	.....
य् + द = य्द	वाक्यम्	युक्तः	पक्वः	शुक्लः	चक्रः	य्य साहाय्यम्
.....	.....	.....	.....	.....	.....	.....
.....	.....	.....	.....	.....	.....	.....
र् + य = र्य	आर्य	कर्णः	वर्गः	अर्चना	विक्रमार्कः	र्र - र्र
.....	.....	.....	.....	.....	.....	.....
.....	.....	.....	.....	.....	.....	.....
ल् + य = ल्य	शल्यः	वल्कलम्	कल्पः	फल्गुणः	गुल्मः	ल्ल मल्लिका
.....	.....	.....	.....	.....	.....	.....
.....	.....	.....	.....	.....	.....	.....

AP SCERT



बालकः पठिष्यति।



बालकाः पठिष्यन्ति।

बालिका खादिष्यति।

बालिकाः खादिष्यन्ति।

अहं पठिष्यामि।

वयं पठिष्यामः।

अहं खादिष्यामि।

वयं खादिष्यामः।

व् + य = व्य	व्यापकम्	व्रणम्				व्व
.....	.....	.....	.....	.....	.....	.....
.....	.....	.....	.....	.....	.....	.....
.....	.....	.....	.....	.....	.....	.....
.....	.....	.....	.....	.....	.....	.....
.....	.....	.....	.....	.....	.....	.....
श् + य = श्य	श्यमाला	आश्चर्यम्	अश्वः	अश्नाति	श्रद्धा	श्श रकामश्शेते
.....	.....	.....	.....	.....	.....	.....
.....	.....	.....	.....	.....	.....	.....
.....	.....	.....	.....	.....	.....	.....
.....	.....	.....	.....	.....	.....	.....
.....	.....	.....	.....	.....	.....	.....
ष् + य = ष्य	प्रेष्यः	पुष्टिः	पुष्करः	प्रतिष्ठा	उष्णम्	ष्ष रामष्षष्ठः
.....	.....	.....	.....	.....	.....	.....
.....	.....	.....	.....	.....	.....	.....
.....	.....	.....	.....	.....	.....	.....
.....	.....	.....	.....	.....	.....	.....
.....	.....	.....	.....	.....	.....	.....
स् + य = स्य	सस्यम्	स्तवः	स्नानम्	स्कन्धः	तिस्रः	स्स दुस्सहः
.....	.....	.....	.....	.....	.....	.....
.....	.....	.....	.....	.....	.....	.....
.....	.....	.....	.....	.....	.....	.....
.....	.....	.....	.....	.....	.....	.....
.....	.....	.....	.....	.....	.....	.....
ह् + य = ह्य	सह्यम्	ब्रह्मा	वह्निः	विह्वलः	ह्रीः	ह्ह
.....	.....	.....	.....	.....	.....	.....
.....	.....	.....	.....	.....	.....	.....
.....	.....	.....	.....	.....	.....	.....
.....	.....	.....	.....	.....	.....	.....
.....	.....	.....	.....	.....	.....	.....

AP SCERT

सम्भाषणाभ्यासः

शीघ्रम्, मन्दम्, उच्चैः, नीचैः

१. अश्वः शीघ्रं गच्छति। 




१. पिपीलिका मन्दम् चलति।

१. वृकः उच्चैः वुक्कति 




१. छात्राः नीचैः स्वरेण पठन्ति।


रुचयः



पुष्पाणि



विद्यास्वाम्यम्



आगच्छतेतः बालाः
आगच्छतेतः बालाः
मधुरं मधुरं मे वचनं
संश्रुणुतेदं मनोहरम्।
विद्यानिलयं प्रयामः
पद्यं गद्यं पठामः
पठने स्वाम्यम् अस्माकम्
पालकैस्तत् प्रकल्पितम्।
विद्यास्वाम्यम् अस्माकं
बालानामिह स्वाम्यरक्षकं

पुस्तकमन्नं प्रददाति
क्रीडाङ्गणमिह विदधाति।
दूरदर्शनात् विश्वज्ञानं
सङ्गणकादपि सार्वकालिकं
सर्वेषामपि समवस्त्रं
दत्वा समतां दर्शयति।
श्रमखिन्नानां बालानां
छायावासं कल्पयति
निःशुल्कविद्यां बोधयति
योग्यं स्थानं प्रापयति।
।। आगच्छतेतः बालाः।।

1 भवतु भारतम्

E9F1W8

अभ्यसनफलितानि

छात्राः कक्ष्योचितस्वरेण गीतं गातुं प्रभवन्ति । C G - 1

गीते विद्यामानानां नूतनपदानां विशेषार्थान् जानन्ति। C G - 2

भारतदेशस्थ विशिष्टपुरुषाणां जीवनविषयं ज्ञास्यन्ति। C G - 3

गीते चरणानां भावं मातृभाषायां वदन्ति । C G - 4

द्वितीयाविभक्तेः बहुवचनरूपाणि ज्ञास्यन्ति। C G - 5




१. चित्रे बालाः किं कुर्वन्ति?

२. भवतां पाठशालायाम् एतादृशं कार्यक्रमं भवान् दृष्टवान् वा? तस्मिन् भागं स्वीकृतवान् वा? कदा?

३. भवन् पाठशालायां प्रतिदिनं प्रार्थनायां किं करोति?

पाठस्य चित्रं पश्यन्तु। तत् उद्दिश्य वदन्तु।



शक्तिसंभृतं युक्तिसम्भृतम्।
शक्तियुक्तिसम्भृतं भवतु भारतम्।।

शस्त्रधारकं शास्त्रधारकम्।
शस्त्रशास्त्रधारकं भवतु भारतम्।।

रीतिसंस्कृतं नीतिसंस्कृतम्।
रीतिनीतिसंस्कृतं भवतु भारतम्।।

कर्मनैष्ठिकं धर्मनैष्ठिकम्।
कर्मधर्मनैष्ठिकं भवतु भारतम्।।

भक्तिसाधकं मुक्तिसाधकम्।
भक्तिमुक्तिसाधकं भवतु भारतम्।।

अर्थाः -

१. रीतिः	=	పద్ధతి, విధానము
२. धर्मः	=	ఆచరించవలసిన పని
३. भक्तिः	=	సేవాభావము
४. मुक्तिः	=	జన్మరాహిత్యస్థితి (మోక్షము)
५. सम्भृतम्	=	కలిసి ఉన్నది

© SCERT AP



भावावगमनम् - प्रतिस्पन्दनम्

१. शृण्वन्तु, विचिन्त्य वदन्तु

अ. प्राचीनभारतीयाः कथम् आसन्?

आ. आधुनिकभारतीयाः कथं सन्ति?

इ. गीतं कं विषयं बोधयन्ति?

२. पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु

अ. पठन्तु अवगच्छन्तु।

భారతదేశం శక్తి (బలం, సామర్థ్యం) మరియు యుక్తి (బుద్ధి, చాతుర్యం) రెండింటితో కూడి ఉండాలి. కేవలం బలం సరిపోదు, తెలివి కూడా అవసరం. అలాగే కేవలం తెలివి సరిపోదు, దాన్ని అమలు చేసే శక్తి కూడా కావాలి. (అందుకే శక్తి మరియు యుక్తి కలిసిన దేశం కావాలి).

భారతదేశం మంచి ఆచారాలు (రీతి) మరియు మంచి నైతిక విలువలు (నీతి) కలిగి ఉండాలి. (మన సంస్కృతి కేవలం సంప్రదాయాలతో కాదు, నైతికతతో కూడా ఉండాలి.)

ప్రజలు తమ పనిని (కర్మ) నిబద్ధతతో చేయాలి, అలాగే ధర్మాన్ని (న్యాయం, సత్యం) పాటించాలి. (కర్తవ్యబద్ధత మరియు ధార్మికత కలిగిన సమాజం కావాలి.)

భక్తి ద్వారా ఆధ్యాత్మికతను పెంపొందించి, చివరికి మోక్షాన్ని (ముక్తి) పొందే మార్గాన్ని అనుసరించాలి. (భక్తి – ముక్తి అనే ఉన్నతమైన జీవన మార్గం ఉండాలి.)

భారతదేశం నిజమైన భారతదేశంగా ఉండాలి. (అంటే తన గొప్ప విలువలు, సంస్కృతి, ధర్మం, జ్ఞానం అన్నింటినీ నిలబెట్టుకుంటూ మహోన్నతంగా ఎదగాలి.)

आ.गीतस्य भावं स्ववाक्यैः वदन्तु।

इ. अधः दत्तम् पद्यं पठित्वा दत्तानां प्रश्नानां समाधानानि लिखन्तु।

किं भोजनं यत्र न गव्यमस्ति
का वस्त्रता यत्र न शुभ्रतास्ति।
का सभ्यता यत्र न नम्रतास्ति
शिक्षा च कायत्र न संस्कृतं स्यात्।।

APSCERT

१. भोजने किं भवितव्यम्। .....

२. शुभ्रता कुत्र भवितव्या? .....

३. सभ्यतायाः किं भवितव्या? .....

४. शिक्षायां किं स्यात्? .....



भावव्यक्तीकरणम् - सर्जनात्मकता

३. लेखनं, स्वीयरचना

अ. पठन्तु, लिखन्तु

१. शक्तियुक्तिः च उभे आवश्यके इति कथं वक्तुं शक्यते?

२. 'मुक्तिः' नाम किम्?

३. शस्त्रशास्त्रधारकं इति भावं विस्तरेण लिखत।

४. गीतानुसारं भारतदेशस्य आदर्शगुणान् लिखन्तु।

आ. चिन्तयन्तु, लिखन्तु

१. गीतस्य गुणान् वयं कथं आचरामः?

२. गीतस्य भावं स्वीयवाक्यैः लिखन्तु।

४. सर्जनात्मकव्यक्तीकरणम्

अ. गीतस्य भावं विवृण्वन्तः मित्राय लेखां लिखन्तु।



भाषांशाः

१. समानार्थकपदानि

१. शक्तिः - शारीरकशक्तिः

२. युक्तिः - आलोचनाशक्तिः

३. शस्त्रम् - आयुधम्

४. शास्त्रम् - ज्ञानम्

५. नीतिः - सत्प्रवर्तना

२. अधो दत्तानि पदानि तेषां विरुद्धार्थकपदैः योजयन्तु

१. युक्तिः	( )	अ. बन्धनम्
२. नीतिः	( )	आ. अयुक्तिः
३. मुक्तिः	( )	इ. अविनीतिः

आ. अत्र प्रत्येकपङ्क्तौ चत्वारि पर्यायपदानि सन्ति। तेषु एकं भिन्नं पदम् अस्ति। तत् अन्विष्य लिखन्तु।


१.	शक्तिः, युक्तिः, सामर्थ्यम्, भित्तिः	.....
२.	रीतिः, नीतिः,भीतिः, पद्धतिः	.....
३.	कर्मा, धर्मः, कार्यम्, मर्मम्	.....
४.	भक्तिः, मुक्तिः, रक्तिः, मोक्षः	.....
५.	शस्त्रम्, शास्त्रम्, वस्त्रम्, ज्ञानम्	.....

७. परियोजनाकार्यम्

अ. भवतां प्रतिवेशिनः बालाः ये विद्यालयं न आगतवन्तः, तान् मधुरवचनैः विद्यालयम् आनयन्तु। नोचेत् तान् उद्दिश्य अध्यापकं सूचयन्तु।

सम्भाषणम्

अधः दत्तानि रेखाङ्कितपदानि चित्रं दृष्ट्वा पठन्तु।



<u>उन्नतः</u> पर्वतः



<u>सुन्दरी</u> बालिका



<u>विशालं</u> भवनम्

उपर्युक्तानि चित्रेषु <u>उन्नतः</u>, <u>सुन्दरी</u>, <u>विशालम्</u> इत्येतानि पदानि पर्वतः, बालिका, भवनम् इत्येतेषां पदानां विशेषतां बोधयन्ति। अतः उन्नतः, सुन्दरी, विशालं, इत्येतानि <u>विशेषणपदानि</u>। पर्वतः, बालिका, भवनम् इत्येतानि <u>विशेष्यपदानि</u>।

☞ यत् पदं विशेषतां बोधयति तत् पदं विशेषणपदम्। यस्य पदस्य विशेषता बोध्यते तत् पदं विशेष्यपदम्।

अधः दत्तानि वाक्यानि अवगच्छन्तु।

पुंलिङ्गे	स्त्रीलिङ्गे	नपुंसकलिङ्गे
सुन्दरः बालकः	सुन्दरी बालिका	सुन्दरं भवनम्
रक्तः स्यूतः	रक्ता पेटिका	रक्तं पुष्पम्
दीर्घः मार्गः	दीर्घा वेणी	दीर्घम् उद्यानम्
निर्मलः आकाशः	निर्मला शाटिका	निर्मलं वस्त्रम

विशेष्यपदस्य आधारेण विशेषणपदे समुचितं लिङ्गं संयोज्य लिखन्तु।

१. ..... कार्यम् (उत्तम)
२. ..... वाक्यम् (मधुर)
३. ..... घटना (अद्भुत)
४. ..... उपकारः (विचित्र)
५. ..... सेवकः (मूर्ख)
६. ..... गायिका (प्रवीण)
७. ..... रचनम् (प्रिय)
८. ..... जलम् (शीतल)



स्वीयमूल्याङ्कनम्




	आम्	न	किञ्चित्
अ. गीतं सरागं गातुं शक्नोमि ।			
आ. गीतस्य भावं स्वीयवाक्यैः वक्तुं शक्नोमि ।			
इ. भारतदेशस्य विशिष्टतां लेखितुं शक्नोमि ।			
ई. आदर्शभारतजीवनविधानम् उद्दिश्य वक्तुं शक्नोमि।			



क्त्वा प्रत्ययः



बालः खादति　　बालः पिबति　　बालः खादित्वा पिबति



बालः स्नाति　　बालः अर्चति　　बालः स्नात्वा अर्चति



उदाहरणानुगुणं क्त्वात्मपदैः वाक्यानि योजयन्तुस्तु–

उदाहरण– 1. सीता मोदकं खादति, सा जलं पिबति । सीता मोदकं खादित्वा जलं पिबति ।

2. जननी स्नाति, पाकं करोति । .....

3. जनकः कार्यालयं गच्छति, कार्यं करोति । .....

4. छात्रः पाठं पठति, निद्रति । .....

5. शिशुः फलं खादति, क्रीडति । .....

6. त्वं पत्रं लिखसि, प्रेषयसि । .....

7. भवती देवं नमति, प्रदक्षिणं करोति । .....

8. सा गीतं श्रुणोति, नृत्यति । .....


9. अध्यापकः पाठं पाठयति, प्रश्नं पृच्छति । .....

10. छात्रः वाक्यं वदति, अर्थं जानाति । .....


1	2	3	4	5
खादित्वा	स्नात्वा	गत्वा	पठित्वा	खादित्वा
6	7	8	9	10
लिखित्वा	नत्वा	श्रुत्वा	पाठयित्वा	उक्त्वा

AP SCERT

ल्यप् प्रत्ययः



बालः उत्तिष्ठति




बालः उत्थाय पूजां करोति



बालिका गृहं प्रविशति



बालिका गृहं प्रविश्य हस्तं प्रक्षालयति।



संस्कृत अभ्यास पुस्तिका

SCERT

1. बालकः गृहपाठं ..... निद्राति। (समाप्य / समापयित्वा)



2. सा द्वारम् ..... अतिथिं सत्करोति। (उद्घाटयित्वा / उद्घाट्य)



3. जननी पुत्रेभ्यः ..... भोजनं करोति। (परिवेष्य / परिवेषयित्वा)

4. छात्रः विद्यालयात् ..... दुग्धं पिबति। (आगत्वा / आगत्य)



5. सा पारितोषिकं ..... आनन्दम् अनुभवति। (प्राप्य / प्राप्त्वा)

6. भगिनी द्वारं ..... रङ्गवल्लीं लिखति। (प्रक्षालयित्वा / प्रक्षाल्य)

7. अर्चकः विग्रहं ..... पूजां करोति। (प्रतिष्ठाप्य / प्रतिष्ठापयित्वा)

8. भवती पत्रं ..... प्रेषयति। (विलिखित्वा / विलिख्य)

9. रामः रावणं ..... अयोध्यां गच्छति। (संहत्य / संहत्वा)

10. सीता रामम् ..... वनं गच्छति। (अनुसृत्य / अनुसृत्वा)

11. तौ मरणवार्ता ..... दुःखम् अनुभवतः। (विज्ञात्वा / विज्ञाय)

12. महिला पेटिकाम् ..... आभरणं पश्यति। (उद्घाट्य / उद्घाटयित्वा)

13. चोरः राजभवनं ..... चौर्यं करोति। (प्रविष्ट्वा / प्रविश्य)

14. सेवकः वृक्षम् ..... फलानि अवचिनोति। (आरुह्य / आरूढ्वा)

15. गुरुः शिष्यम् ..... गच्छति। (अध्याप्य / अध्यापयित्वा)

AP SCERT

पठन्तु - नन्दन्तु

चिन्तनस्य विषयः तु...



कश्चन गुरुः शिष्यः च अश्वम् आरुह्य गच्छन्तौ आस्ताम्। रात्रिः अभवत्। कस्मिंश्चित् वने तौ वासं कृतवन्तौ। गुरुः उक्तवान् - ''अहं निद्रां करोमि। अश्वः वृक्षे बद्धः अस्ति। भवान् तं रक्षतु'' इति। ''निद्रानिवारणार्थं मया किं करणीयम्?'' इति पृष्टवान् शिष्यः।

''किमपि चिन्तयन् भवतु भवान्। तदा निद्रा न बाधते '' इति उक्तवान् गुरुः। शिष्यः एतत् अङ्गीकृतवान्। किञ्चित्कालानन्तरं जागरणं प्राप्य गुरुः पृष्टवान् - ''शिष्य ! किम् अधिकृत्य चिन्तयन् अस्ति भवान्?'' इति।

''नक्षत्राणि स्वयमेव उत्पन्नानि, उत तानि गगने केनचित् स्थापितानि इति चिन्तयन् अस्मि '' इति अवदत् शिष्यः।

गुरुः पुनरपि निद्रामग्नः जातः। द्वित्रघण्टानन्तरं तेन जागरणं प्राप्तम्। सः शिष्यम् अपृच्छत् - ''किं चिन्तयन् अस्ति भवान्?'' इति।

''समुद्रजलं स्वयमेव लवणमयं जातम्, उत कोऽपि समुद्रे लवणं योजितवान् इति चिन्तयन् अस्मि'' इति उक्तवान् शिष्यः। गुरुः तृप्त्या पुनः निद्राम् अकरोत्।

उषःकालः जातः। शिष्यः जागृतः एव आसीत्। ''इदानीं किं चिन्त्यते भवता?'' इति अपृच्छत् गुरुः।

''गुरुवर्य ! वृक्षे बद्धः अश्वः न दृश्यते। सः स्वयमेव बन्धनात् मुक्तः जातः, उत कोऽपि तम् उन्मोच्य नीतवान् स्यात् इति चिन्तयन् अस्मि '' इति अवदत् शिष्यः।

शिष्यस्य अविवेकं दृष्ट्वा हसनीयम् उत विषादः प्रकटनीयः इति अजानन् गुरुः मौनम् आश्रितवान्।

APSCERT

2 अरण्यम्

J9A9J4

अभ्यसनफलितानि

छात्राः अमरकोशग्रन्थस्य प्राथमिकपरिचयज्ञानं सम्पादयेयुः। C G - 1


विविधानां पदानां विविधभाषासु समानार्थकपदानि वक्तुं प्रभवेयुः। C G - 2

श्लोकानां पठने समर्थाः भवेयुः। C G - 3


अरण्यस्य वृक्षस्य पत्रस्य पुष्पस्य खगस्य समानार्थकपदानां लेखने सामर्थ्यं प्राप्नुयुः। C G - 4


अस्माकं नित्यजीवने अरण्यानि, पक्षिणः, वृक्षाः न सन्ति चेत् कथं भवेत् इति कथां मातृभाषया लिखेयुः। C G - 5

चित्रं पश्यन्तु, चिन्तयन्तु, वदन्तु।



१. चित्रे आपणिकः कस्य विक्रयणं करोति ?
२. जनाः आपणिकं किं पृच्छन्ति ?
३. नारिकेलस्य अन्यानि नामानि वदन्तु।
४. एकस्य वस्तुनः विभिन्नानि नामानि वदन्तु।


पाठस्य चित्रं पश्यन्तु। तत् उद्दिश्य वदन्तु।
अटव्यरण्यं विपिनं गहनं काननं वनम्।
महारण्यम् अरण्यानि गृहारामस्तु निष्कुटः।।
वृक्षो महीरुहश्शाखी विटपी पादपस्तरुः।
अनोकहः कुटस्सालः पलाशी द्रुद्रुमागमाः।।
पत्रं पलाशं छदनं दलं पर्णं छदः पुमान्।
पल्लवोऽस्त्री किसलयं विस्तारो विटपोऽस्त्रियाम्।।
स्त्रियस्सुमनसः पुष्पं प्रसूनं कुसुमं सुमम्।
मकरन्दः पुष्परसः परागस्सुमनोरजः।।



खगो विहङ्ग-विहग-विहङ्गम-विहायसः।
शकुन्ति-पक्षि शकुनि-शकुन्त-शकुनद्विजाः।।

पतत्रि-पत्रि-पतग-पतत्-पत्ररथाण्डजाः।
नगौको-वाजि-विकिर-विविष्करपतत्रयः।।

नीडोद्भवा गरुत्मन्तः पित्सन्तो नभसङ्गमाः।

अर्थाः -

१.	काननम्	=	అడవి
२.	पुष्परसः	=	మకరందము (తేనె)
३.	विहङ्गः	=	పక్షి
४.	परागः	=	పుప్పొడి
५.	किसलयम्	=	చిగురు



भावावगमनम् - प्रतिस्पन्दनम्

१. शृण्वन्तु, विचिन्त्य वदन्तु

अ. पाठ्यांशचित्रे कानि कानि सन्ति?

आ. क्रूरमृगाः कुत्र वसन्ति?

इ. गृहे भवतः अन्यत् नाम अस्ति चेत् वदन्तु?

२. पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु

अ. पदानां भावान् अवगच्छन्तु। तानि चित्रैः सह योजयन्तु।

१. अटवी, अरण्यम्, विपिनम्, गहनम्, वनम्, काननम् महारण्यम्।



२. गृहारामः, निष्कुटः।



३. वृक्षः, महीरुहः, शाखी, विटपी, पादपः, तरुः।



४. पत्रम्, पलाशम्, छदनम्, दलम्, पर्णम्, छदः।



५. पल्लवः, किसलयः।



६. विस्तारः, विटपः।

७. सुमनसः, पुष्पम्, प्रसूनम्, कुसुमम्, सुमम्।

AP SCERT



८. मकरन्दः, पुष्परसः।



९. परागः, सुमनोरथः।



१०. खगः, विहङ्गः, विहङ्गमः, विहायसः, शकुन्तिः, शकुनिः, शकुन्तः, शकुनः, नभसङ्गमः, गरुत्मान्, पक्षी, पतत्री, पत्री, पत्ररथी, पतत्रिः, पतत्, पतगः, द्विजः, अण्डजः, नीडोद्भवः, वाजी, नगौकः, पित्सन्तः, विकिरः, विष्करः।

आ. अधः दत्तम् पद्यं पठित्वा दत्तानां प्रश्नानां समाधानानि लिखन्तु।

परोपकाराय फलन्ति वृक्षाः परोपकाराय वहन्ति नद्यः
परोपकाराय दुहन्ति गावः परोपकारार्थमिदं शरीरम्

१. वृक्षाः किमर्थं फलन्ति? .....

२. नद्यः परोपकाराय किं कुर्वन्ति? .....

३. गावः परोपकाराय किं कुर्वन्ति? .....

४. इदं शरीरम् किमर्थम्? .....



भावव्यक्तीकरणम् - सर्जनात्मकता

३. लेखनं, स्वीयरचना

अ. पठन्तु, लिखन्तु

१. अरण्यस्य अन्यनामानि लिखन्तु।

२. 'वृक्षः' इति पदस्य अन्यनामानि लिखन्तु।

३. खगस्य नामानि लिखन्तु।

आ. चिन्तयन्तु, लिखन्तु

१. एकस्य चित्रस्य/ एकस्य पदार्थस्य/ एकस्य विषयस्य अनेकानि नामानि सन्ति इति अवगतम् खलु! अनेन ज्ञानेन उपयोगः कः इत्यंशं पञ्चवाक्यैः लिखन्तु।

२. जीवसमतौल्यं नाम किम्? अरण्येन/वृक्षैः लाभाः के?

APSCERT

४. सर्जनात्मकव्यक्तीकरणम्

अ. लोके अरण्यानि, पक्षिणः, वृक्षाः न भवन्ति चेत् अस्माकं नित्यजीवनं कथं भवेत् इति ऊहित्वा एकां कथां वदन्तु/लिखन्तु।



१. समानार्थकपदानि

१. पत्रम् - पर्णम्, दलम्
२. पादपः - वृक्षः, तरुः
३. प्रसूनम् - पुष्पम्, कुसुमम्
४. विहङ्गः - पक्षी, खगः

२. अधो दत्तानि पदानि तेषां विरुद्धार्थकपदैः योजयन्तु

१. सह	( )	अ. अश्रद्धा
२. श्रद्धा	( )	आ. निरुपयोगः
३. लाभः	( )	इ. अज्ञानम्
४. उपयोगः	( )	ई. विना
५. ज्ञानम्	( )	ऊ. नष्टः

आ. अत्र प्रत्येकपङ्क्तौ चत्वारि पर्यायपदानि सन्ति। तेषु एकं भिन्नं पदम् अस्ति। तत् अन्विष्य लिखन्तु।

१. पुष्पम्, प्रसूनम्, विपिनम्, कुसुमम्। .....
२. पलाशम्, पलाशी, दलम्, छदः। .....
३. विहगः, खगः, द्विजः, कुटः। .....
४. अण्डजः, पतत्रिः, पुष्परसः, शकुनिः। .....
५. अरण्यम्, वनम्, गहनम्, पर्णम्। .....
६. मकरन्दः, विहायसः, सूकरः, पक्षी। .....
७. गृहारामः, सालः, द्रुमः, तरुः। .....

APSCERT

८. नगौकः, पतत्री, शाखी, विकिरः। .....

९. महीरुहः, विटपः, अनोकहः, पादपः। .....

१०. दलम्, पत्रम्, सुमनाः, छदः। .....

५. व्याकरणांशाः

अ. अत्र शिवस्य दिनचर्या दत्ता। तां पठित्वा सः केन /कया सह किं करोतीति लिखन्तु।

मीनायाः अग्रजः शिवः। सः अम्बया सह निद्रातः उत्तिष्ठति। दन्तकूर्चेन दन्तधावनं करोति। चषकेण क्षीरं पिबति। मित्रैः सह धावति। सुफेनकेन/उष्णजलेन स्नानं करोति। अनुजया सह अल्पाहारं स्वीकरोति। शिवः लेखन्या गृहपाठं लिखति। अङ्कन्या न लिखति। मीनया सह द्विचक्रिकया पाठशालां गच्छति। श्रद्धया पाठं श्रुणोति।

	केन सह/कया सह	किं करोति
शिवः		उत्तिष्ठति।
		दन्तधावनं करोति।
		क्षीरं पिबति।
		धावति।
		स्नानं करोति।
		अल्पाहारं करोति।
		शालां गच्छति।
		गृहपाठं लिखति।

६. परियोजनाकार्यम्

अ. विविधपक्षिणां, विविधमृगाणां, विविधवृक्षाणां च चित्राणि सङ्कलयन्तु।



स्वीयमूल्याङ्कनम्



	आम्	न	किञ्चित्
अ. श्लोकान् स्पष्टोच्चारणेन पठितुं शक्नोमि।			
आ. अरण्यं कथं भवतीति वक्तुं शक्नोमि ।			
इ. अरण्यस्य, वृक्षस्य, खगस्य च अन्यनामानि लेखितुं शक्नोमि ।			
ई. सूचनानुसारं कथां लेखितुं शक्नोमि ।			

सम्भाषणम्

द्वितीयाविभक्तिः



बालकः



विद्यालयः



बालकः विद्यालयं गच्छति



माता



रोटिका



माता रोटिकां करोति




चटका



जलम्




चटका जलं पिबति



अध्यापिका



घटी




अध्यापिका घटीं पश्यति

द्वितीयाविभक्तिः - बहुवचनानि




अध्यापकः




छात्राः




अध्यापकः छात्रान् आह्वयति




बालकः



अक्षराणि




बालकः अक्षराणि लिखति



मालाकारः



माला




मालाकारः मालाः निर्माति



श्रीधरः



अङ्कनी



श्रीधरः आङ्कनीः क्रीणाति

द्वितीयाविभक्तिः - बहुवचनाभ्यासः

१. बालाः ..... (वृक्ष) आरोहन्ति।

२. राणी ..... (अङ्कनी) आनयति।

३. छात्राः ..... (पीठम्) स्थापयन्ति।

४. कविः ..... (कविता) वदति।

५. महाराजः ..... (नर्तकी) आह्वयति।

द्वितीयाविभक्तिः - एकवचन - बहुवचनाभ्यासः

दत्तवचनानुसारं कोष्ठकस्थपदेन रिक्तस्थानानि पूरयन्तु।

१. शिशुः	..... (चाकलेहः) खादति।	(एक.व)
२. पितामहः	..... (कथा) वदति।	(बहु.व)
३. भर्ता	..... (पत्नी) अह्वायति।	(एक.व)
४. राजेशः	..... (पिञ्जः) नुदति।	(बहु.व)
५. रामः	..... (पुस्तकं) पठति।	(बहु.व)


पुरातनम् - नूतनम्





पुरातनम् कार् यानम्



नूतनम् कार् यानम्















बहु - किञ्चित्



प्रातःकाले आतपः किञ्चित् भवति




मध्याह्ने आतपः बहु भवति












दीर्घः - ह्रस्वः





वानरस्य पुच्छं दीर्घम् अस्ति गजस्य पुच्छं ह्रस्वम् अस्ति ....




....

उन्नतः - वामनः



तालवृक्षः उन्नतः अस्ति नारिकेलवृक्षः वामनः अस्ति ....





....

3 साहसम्

M6V6F7

अभ्यसनफलितानि

छात्राः साहसगुणस्य महत्वं ज्ञेयुः। C G - 1


पाठ्यभागस्य सारांशं मातृभाषया वक्तुं समर्थाः भवेयुः। C G - 2


पाठ्यभागस्य पठने यत्नं कुर्युः। C G - 3

वीरतापुरस्कारणाम् उद्दिश्य लेखनसामर्थ्यं प्राप्नुयुः। C G - 4

एतादृश्याः अन्यां घटनां स्वीयवाक्यैः लिखितुं समर्थाः भवेयुः। C G - 5

चित्रं पश्यन्तु, चिन्तयन्तु, वदन्तु।





१. अस्मिन् चित्रे किमस्ति?

२. चित्रं दृष्ट्वा समुचितसन्दर्भं वदन्तु।

३. चित्रस्थौ बालकौ किं प्रदर्शयतः?

APSCERT

साहसम्

भारतसर्वकारः भारतस्य साहसबालेभ्यः राष्ट्रियपुरस्कारान् ददाति। ये बालाः स्वार्थरहितया, त्यागबुध्या विशेषसाहसं प्रदर्शयन्ति तेभ्यः निर्णीतेभ्यः बालेभ्यः एते पुरस्काराः प्रदीयन्ते।





एते पुरस्काराः भारतपुरस्कारः, सञ्जयचोप्रापुरस्कारः, गीताचोप्रापुरस्कारः, गयाधानी पुरस्कारः,

राष्ट्रियवीरतापुरस्कार : इति विविधाः सन्ति।

राज्यसर्वकारतः अनुमतानि आवेदनपत्राणि राष्ट्रियस्तरे अनुमन्यन्ते। प्रतिवर्षं बालदिनोत्सवे (नवम्बर्१४ दिनाङ्के) पुरस्कारान् उद्घोषयन्ति। गणतन्त्रदिनोत्सवे (जनवरी२६ दिनाङ्के) बालेभ्यः तान् वितरन्ति।

भारतसर्वकारः वीरतापुरस्कारेण सम्मानितेभ्यः बालकेभ्यः विद्यालयशिक्षणार्थं वित्तसाहाय्यं करोति।



अध्यापिका - २०१० तमे वर्षे राष्ट्रियवीरतापुरस्कारेण २३ बालाः सम्मानिताः। तेषु जिस्मी इति बालिका कथं स्ववीरतां प्रदर्शितवती इति श्रावयामि। शृण्वन्तु।

सर्वे बालाः - आम्।

पाठस्य चित्राणि पश्यन्तु। तानि उद्दिश्य वदन्तु।

अध्यापिका - जिस्मी इति बालिका द्वादशवर्षीया। एषा पेरिञ्चेरी इति ग्रामे निवसति। एतस्याः ग्रामः केरलराज्यस्य त्रिचूर् जनपदे अस्ति।


जिस्मी, चेर्पू इति ग्रामे सर्वकारीये उच्चतरमाध्यमिकविद्यालये सप्तमकक्ष्यायां पठति। २००९ वर्षे डिसम्बर २० तमे दिनाङ्के सा जले कूर्दितवती। पुरस्कारस्वीकरणसमये सा एवम् उक्तवती।

''वस्त्रप्रक्षालनार्थम् अहं तडागं गतवती। तत्र द्वयोः बालयोः रोदनं श्रुतवती। तत् रोदनं मम अनुजयोः रोदनमिव आसीत्। अहं तडागे कूर्दित्वा बहुकष्टेन द्वौ अपि एकस्मिन्नेव समये बहिः आनेतुं प्रयतितवती। यदा मम शक्तिः हीयमाना आसीत् तदा अहम् अनुभूतवती, ''यत् तौ रक्षितुं भगवान् मह्यं शक्तिं यच्छन् अस्ति तयैव शक्त्या अहं द्वावपि रक्षितुं शक्ता अभवम्'' इति।

जिस्मी एकं नववर्षीयं बालकम्, अष्टवर्षीयां बालिकां च रक्षितवती इत्यतः सा गीताचोप्रा राष्ट्रियपुरस्काराय चिता अभवत्।

अतः बालाः ! यः आर्तानां रक्षणं करोति भगवान् तस्य साहाय्यं करोति।

साहसे श्रीः वसति। धैर्ये साहसे लक्ष्मीः।।







अर्थाः -

१. काननम्	=	అడవి
२. पुष्परसः	=	మకరందము (తేనె)
३. विहङ्गः	=	పక్షి
४. परागः	=	పుప్పొడి
५. किसलयम्	=	చిగురు

भावावगमनम् - प्रतिस्पन्दनम्

१. शृण्वन्तु, विचिन्त्य वदन्तु

अ. चित्रं पश्यन्तु। के किं कुर्वन्ति इति वदन्तु।

आ. वीरतापुरस्कारः किमर्थं दीयते?

इ. २०१० तमे वर्षे कियन्तः बालाः वीरतापुरस्कारं प्रप्तवन्तः?

२. पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु

अ. अधः दत्तेषु वाक्येषु सत्यासत्यतां चिह्नीकुर्वन्तु।

१. जिस्मी इति बालिका द्वादशवर्षीया। (सत्यम् / असत्यम्)

२. अध्यापिका वीरतापुरस्कारेण सम्मानिता। (सत्यम् / असत्यम्)

३. जिस्मी सञ्जयचोप्रा पुरस्काराय चिता। (सत्यम् / असत्यम्)

४. जिस्मी द्वौ बालौ रक्षितवती। (सत्यम् / असत्यम्)

५. पेरिच्चरी चण्डीघट्ट समीपे अस्ति। (सत्यम् / असत्यम्)

ई. अधः दत्तम् श्लोकं पठित्वा दत्तानां प्रश्नानां समाधानानि लिखन्तु।

मक्षिकाः व्रणमिच्छन्ति

सन्धिमिच्छन्ति साधवः।

नीचाः कलहमिच्छन्ति

धनमिच्छन्ति पार्थिवाः

१. मक्षिकाः किम् इच्छन्ति? .....

२. साधवः किम् इच्छन्ति? .....

३. नीचाः किम् इच्छन्ति? .....

४. पार्थिवाः किम् इच्छन्ति? .....



भावव्यक्तीकरणम् - सर्जनात्मकता

३. लेखनं, स्वीयरचना

अ. पठन्तु, लिखन्तु

१. पुरस्काराः कतिविधाः सन्ति?

२. जिस्मी इति बालिका कं पुरस्कारं प्राप्तवती?

३. जिस्मी तडागे किमर्थं कूर्दितवती?

४. वीरतापुरस्कारान् कदा वितरन्ति?

AP SCERT

आ. चिन्तयन्तु, लिखन्तु

१. नवम्बर् १४ दिनाङ्कस्य वैशिष्ट्यं लिखन्तु?

२. वीरतापुरस्कारस्य चयनप्रक्रिया का?

३. केरलराज्यस्य विषये पञ्चवाक्यानि लिखन्तु?

४. सर्जनात्मकव्यक्तीकरणम्



अ. एतां घटनां स्वजीवने सम्भूतामिव ऊहित्वा लिखन्तु।

आ. चित्रं दृष्ट्वा कथां लिखन्तु।



भाषांशाः

१. समानार्थकपदानि

१. सर्वकारः	-	प्रभुत्वम्
२. पुरस्कारः	-	बहुमानम्
३. तडागः	-	ह्रदः
४. श्रीः	-	लक्ष्मीः
५. कष्टम्	-	क्लेशः

२. अधो दत्तानि पदानि तेषां विरुद्धार्थकपदैः योजयन्तु

१. पुरस्कारः	( )	अ. रोदनम्
२. हसनम्	( )	आ. अन्तः
३. वितरन्ति	( )	इ. अशक्ता
४. शक्ता	( )	ई. तिरस्कारः
५. बहिः	( )	ऊ. स्वीकुर्वन्ति

AP SCERT

३. भिन्नम् पदम्

१. सञ्जयचोप्रापुरस्कारः, गीताचोप्रापुरस्कारः, गयाधानीपुरस्कारः, द्रोणाचार्यपुरस्कारः .....

२. पेरिञ्चेरी, त्रिचूरु, चेर्पू, शिवमोग्गा .....

३. धैर्यम्, साहसम्, लक्ष्मीः, भीतिः, ...

४. बालदिनोत्सवः, गणतन्त्रदिनोत्सवः, स्वातन्त्र्यदिनोत्सवः, वार्षिकोत्सवः .....

पदजालाभिवृद्धिः, भाषाक्रीडाः

१. सङ्ख्याः।

१. सङ्ख्यायाः लेखने उच्चारणे च किञ्चित् वैशिष्ट्यम् अस्ति।

७२ इति सङ्ख्यायाः उच्चारणं 'द्विसप्ततिः' इति।

अत्र '२' सङ्ख्या प्रथमस्थाने अस्ति। सप्तसङ्ख्या दशमस्थाने अस्ति। गणिते तत् ७०+२ इति क्रमेण लिखामः। प्रथमस्थाने विद्यमानः अङ्कः पूर्वम् उच्चरणीयः। दशमस्थाने विद्यमानः च अनन्तरम् उच्चरणीयः।

२. एवमेव शतस्थानिकस्य, ततः परं सहस्रस्थानिकस्य उच्चारणं करणीयम्।

१९४७ इति सङ्ख्यायाः उच्चारणं - सप्त-चत्वारिंशत्-उत्तर-नव-दशशतम्।

३. भवतां/भवतीनां जन्मवर्षं लिखित्वा संस्कृतेन उच्चरन्तु।

४. एताः सङ्ख्याः संस्कृतेन वदन्तु, लिखन्तु च।

1. १८९२ - .....
2. १९९९ - .....
3. २०१२ - .....
4. २००० - .....
5. १९९८ - .....
6. २००२ - .....

परियोजनाकार्यम्

अ. प्रान्तीयदिनपत्रिकासु प्रतिदिनं साहसबालानां कथाः प्रकाश्यन्ते। ताः सङ्गृह्य आनयन्तु।

आ. एकां कथां संस्कृतेन अनूद्य आनयन्तु।

APSCERT

अतः

आरोग्यं सम्यक् नास्ति। एतत् **कारणसूचकवाक्यम्।**

चिकित्सालयं गच्छामि। एतत् **कार्यसूचकवाक्यम्।**


☞ *यदा कारणसूचकवाक्यं पूर्वम् उक्त्वा, कार्यसूचकवाक्यम् अनन्तरम् उच्यते तदा कार्यसूचकवाक्यस्य अग्रे 'अतः' इति अव्ययं योजनीयम्।*

उदा।। १. आरोग्यं सम्यक् नास्ति। **अतः** चिकित्सालयं गच्छामि।


२. विद्युत् नास्ति। **अतः** दण्डदीपः न ज्वलति।

३. शैत्यम् अधिकम् अस्ति। **अतः** बहिः न आगच्छामि।


एवमेव 'अतः' उपयुज्य अन्यानि वाक्यानि स्वयं रचयन्तु।



बालकः क्रीडितुम् इच्छति अतः क्रीडांगणं गच्छति।



माता पचितुम् इच्छति अतः पाकशालां गच्छति।



पात्रम् मलिनं अस्ति। अतः पात्रं प्रक्षालयामि।



भास्करः निद्रातुम् इच्छति। अतः कटं प्रसारयति।

आ. 'अतः' इति अव्ययम् उपयज्य वाक्यानि निर्मान्तु।

अ. यानं शीघ्रं प्राप्तम्।		१. इदं न क्रीणामि।
आ. सः चतुरः चित्रकारः		२. जनाः स्वेदकं धरन्ति।
इ. ते सत्यवादिनः	अतः	३. शीघ्रम् आगतः
ई. बहुशैत्यं भवति		३. सम्यक् चित्रं लिखति।
उ. मूल्यम् अधिकमस्ति		५. सदा सत्यं वदन्ति।

यतः

चिकित्सालयं गच्छामि। एतत् **कार्यसूचकवाक्यम्।**


आरोग्यं सम्यक् नास्ति। एतत् **कारणसूचकवाक्यम्।**

☞ *कार्यसूचकवाक्यं पूर्वम् उक्त्वा कारणसूचकवाक्यम् अनन्तरम् उच्यते चेत् तस्य कारणसूचकवाक्यस्य पूर्वं ''यतः'' इति अव्ययं योजनीयम्।*

उदा।। १. चिकित्सालयं गच्छामि **यतः** आरोग्यं सम्यक् नास्ति।

२. दण्डदीपः न ज्वलति **यतः** विद्युत् नास्ति।

३. बहिः न आगच्छामि **यतः** शैत्यम् अधिकम् अस्ति।



बालकः खादति यतः सः बुभुक्षितः अस्ति।



बालिका जलं पिबति यतः सा पिपासया अस्ति।



मशकाः मानवं पीडयन्ति यतः पङ्कस्य पार्श्वे अस्ति।

ई. 'यतः' इति अव्ययम् उपयुज्य वाक्यानि रचयन्तु।

अ. अद्य वार्तापत्रिका नागता।		१. ह्यः पर्वदिनम् आसीत् !
आ. गृहपाठं न लिखितवती।		२. टिप्पण्याः चौर्यम् अभवत्।
इ. भवन्तम् इतः पूर्वं न दृष्टवान्।	यतः	३. भवान् इदानीमेव दृश्यते।
ई. तत् वस्त्रं मास्तु।		४. तस्य मूल्यमधिकम्।
उ. अहं संस्कृतमेव पठामि।		५. संस्कृतं सरलम्।

एवमेव 'यतः' उपयुज्य अन्यानि वाक्यानि स्वयं रचयन्तु।

सम्भाषणम्


तृतीयाविभक्तिः



बालकः




हस्तः



बालकः हस्तेन लिखति




बालकः



चमसः




बालकः चमसेन खादति



आपणिकः



तुला



आपणिकः तुलया तोलयति



अध्यापिका



लेखिनी



अध्यापिका लेखिन्या लिखति

तृतीया - एकवचनम् - बहुवचनम्

	ए.व	ब.व
१. हस्तः	हस्तेन	हस्तैः
२. चमसः	चमसेन	चमसैः
३. तुला	तुलया	तुलाभिः
४. लेखनी	लेखन्या	लेखनीभिः

अभ्यासः

उदाहरणानुसारं तृतीयाविभक्त्यन्तपदैः रिक्तस्थानानि पूरयन्तु

उद. – व्याधः (वाण) बाणेन मारयति।
1. वृद्धः (चषकः) ..... पिबति।
2. जनकः (हस्तः) ..... ताडयति।
3. क्रीडकः (कन्दुकेन) ..... क्रीडति।
4. उद्यानकारः (जलेन) ..... सिञ्चति।
5. नृपः (गजः) ..... गच्छति।

उदाहरणानुसारं तृतीयाविभक्त्यन्तपदैः रिक्तस्थानानि पूरयन्तु

उदा. – वृद्धा (माला(एकव)) मालया जपति।
उदा. – चित्रकारः (अङ्कनी(बहुव.)) अङ्कनीभिः चित्रं रचयति
1. आरक्षकाः (अधः(बहुव.)) ..... आगच्छन्ति।
2. आपणिकः (पेटिका (एक्व.)) ..... नयति।
3. भक्ताः (पुष्प(बहुव)) ..... देवं अर्चन्ति।
4. महिलाः (द्रोणी(बहुव)) ..... जलम् आनयन्ति।
5. सौचिकः (सूची (एक्व) ..... सीव्यति।
6. सर्पः (फणा(एक्व.)) ..... दशति।

AP SCERT


सह - विना योगे तृतीया




रामेण **सह** सीता अस्ति



रामेण **विना** सीता अस्ति



पुत्रेण **सह** पिता अस्ति



पुत्रेण **विना** पिता अस्ति

अभ्यासः

उदाहरणानुगुणं रिक्तस्थानानि पूरयन्तु–

1. ....रामः ....सीतया.. रामः / सीता सह वनं गच्छति।
2. .... लक्ष्मणः / उर्मिला विना वनं गच्छति।
3. .... जननी / पुत्री विना न तिष्ठति।
4. .... जनकः / पुत्रः सह मन्दिरम् आगच्छति।
5. .... दशरथः / रामः विना न जीवति।
6. .... अनुजः / अग्रजः सह प्रातः भ्रमणं करोति।
7. .... स्वास्थ्यम् / व्यायामः विना न भवति।
8. .... कमलम् / सूर्यः विना न विकसति।
9. .... शास्त्राभ्यासः / पठनम् विना न भवति।
10. .... कमलम् / पङ्कः विना न भवति।

तुमुन्




छात्रः **पठितुं** विद्यालयं गच्छति



बालकः **स्नातुं** शौचालयं गच्छति



वाणी **नमितुं** मन्दिरं गच्छति



शिशुः चाकलेहं **खादितुं** इच्छति



अहं **नर्तितुं** शक्नोमि



वयं **पचितुं** शक्नुमः

मञ्जूषातः उचितं पदं योजयित्वा उदाहरणानुगुणं वाक्यानि पुनः लिखन्तु –

उदा-1. सः **पठितुम्** इच्छति ।
2. सः गानम् इच्छति ।

उदा०- सः **गातुम्** इच्छति ।
सः गातुम् इच्छति ।

1 पठितुम्	2 गातुम्	3 लेखितुम्
4 कथयितुम्	5 गन्तुम्	6 पातुम्
7 खादितुम्	8 दातुम्	9 हसितुम्
10 चलितुम्	11 क्रीडितुम्	12 धावितुम्
13 कर्तुम्	14 द्रष्टुम्	15 अर्चितुम्

3. सः लेखनम् इच्छति ।
4. सः कथनम् इच्छति ।
5. सः गमनम् इच्छति ।
6. सः पानम् इच्छति ।
7. सः खादनम् इच्छति ।
8. सः दानम् इच्छति ।
9. सः हसनम् इच्छति ।
10. सः चलनम् इच्छति ।
11. सः क्रीडनम् इच्छति ।
12. सः धावनम् इच्छति ।
13. सः करणम् इच्छति ।
14. सः दर्शनम् इच्छति ।
15. सः अर्चनम् इच्छति ।


सः ..... इच्छति ।
सः ..... इच्छति ।
सः ..... इच्छति ।
सः ..... इच्छति ।
सः ..... इच्छति ।
सः ..... इच्छति ।
सः ..... इच्छति ।
सः ..... इच्छति ।
सः ..... इच्छति ।
सः ..... इच्छति ।
सः ..... इच्छति ।
सः ..... इच्छति ।
सः ..... इच्छति ।
सः ..... इच्छति ।
सः ..... इच्छति ।





APSCERT

किन्तु - निश्चयेन



गृहस्य पुरतः शुनकः अस्ति। किन्तु न भषति, निश्चयेन वुक्कति।



माता स्वर्णम् आर्जयति। किन्तु न धरति, निश्चयेन पुत्रिकायै ददाति।



मृगः वेगन धावति। किन्तु निश्चयेन व्याघ्रेण गृह्यते

4 कार्यदक्षता

W7Z6M6

अभ्यसनफलितानि

छात्राः रामायणमहाकाव्यात् कार्यसाधने दक्षतायाः प्राधान्यं अधिकृत्य ज्ञानं लभेयुः। C G - 1


हनूमतः स्वामिभक्तिनम् उद्दिश्य मातृभाषया वक्तुं प्रभवेयुः। C G - 2

श्लोकान् कण्ठस्थीकर्तुं भवेयुः। C G - 3

श्लोकानां भावलेखने समर्थाः भवेयुः। C G - 4

कथारूपेण मातृभषया लिखितुं यत्नं कुर्युः। C G - 5

चित्रं पश्यन्तु, चिन्तयन्तु, वदन्तु।




१. चित्रे के के सन्ति? किं कुर्वन्ति?
२. तदनन्तरं किमभवत् इति वदन्तु?
३. रामाय के के कीदृशं साहाय्यं कृतवन्तः?

© NCERT

पाठस्य चित्राणि पश्यन्तु। तानि उद्दिश्य वदन्तु।

१. स च सर्वान् समानीय वानरान् वानरर्षभः।
दिशः प्रस्थापयामास दिदृक्षुः जनकात्मजाम्।।




भावः – శ్రీరాముడు సుగ్రీవుణ్ణి కిష్కింధారాజ్యానికి రాజుగా చేసిన తరువాత వానరరాజైన సుగ్రీవుడు తన సైనికులైన వానరులను సీతను వెతకడానికై అన్ని దిక్కులకు పంపాడు.

२. ततो गृध्रस्य वचनात् सम्पातेः हनुमान् बली।
शतयोजनविस्तीर्णं पुप्लुवे लवणार्णवम्।।




भावः– తరువాత జటాయువు అనే గ్రద్దకు అన్న అయిన సంపాతి చెప్పిన సమాచారంతో సీత లంకలో ఉన్నట్లు తెలిసింది. అంతట బలవంతుడగు హనుమంతుడు నూరు ఆమడల (800మైళ్ళు) వెడల్పు గల ఉప్పునీళ్ళ సముద్రాన్ని దాటాడు.




३. तत्र लङ्कां समासाद्य
पुरीं रावणपालिताम्।
ददर्श सीतां ध्यायन्तीम्
अशोकवनिकां गताम्।।

भावः– హనుమంతుడు సముద్రాన్ని దాటి అక్కడ రావణుడు పరిపాలిస్తున్న లంకానగరంలో ప్రవేశించి అశోకవనంలో, ఎప్పుడూ "రామనామాన్నే" స్మరిస్తూ ఉన్న సీతాదేవిని చూశాడు.

४. **निवेदयित्वाऽभिज्ञानं प्रवृत्तिं च निवेद्य च।**
समाश्वास्य च वैदेहीं मर्दयामास तोरणम्।।



భావః– ఆంజనేయుడు శ్రీరాముడిచ్చిన ఉంగరాన్ని సీతాదేవికిచ్చి, రామలక్ష్మణుల కుశలవార్తలను తెలిపి, ఆమెను ధైర్యవచనాలతో ఓదార్చి, తరువాత ఆ అశోకవనం వాకిలిని (తోరణాన్ని) విరగగొట్టాడు.



५. **पञ्चसेनाग्रगान् हत्वा सप्तमन्त्रिसुतानपि।**
शूरमक्षञ्च निष्पिष्य ग्रहणं समुपागमत्।।


భావః– ఆంజనేయుడు తనను ఎదిరించడానికి వచ్చిన ఐదుగురు సేనాపతులను, ఏడుగురు మంత్రి కుమారులను, శూరుడగు అక్షుడను రావణుని పుత్రుని చంపి, చివరకు రావణుని మరియొక కుమారుడైన ఇంద్రజిత్తు ప్రయోగించిన బ్రహ్మాస్త్రానికి పట్టుబడ్డాడు.

६. **अस्त्रेणोन्मुक्तमात्मानं ज्ञात्वा पैतामहाद्वरात्।**
मर्दयन् राक्षसान् वीरो यन्त्रिणस्तान् यदृच्छया।।

భావః– పూర్వం బ్రహ్మదేవుడు ఇచ్చిన వరప్రభావం వల్ల ఆంజనేయుడు బ్రహ్మాస్త్రప్రభావం నుంచి తను విముక్తుడయ్యాడని తెలుసుకొని తనను త్రాడుతో కట్టి లాగుతున్న రాక్షసులను మర్దించి, కొట్టి చంపాడు.

७. ततो दग्ध्वा पुरीं लङ्कामृते सीतां च मैथिलीम्।
रामाय प्रियमाख्यातुं पुनरायान्महाकपिः।।

भावः- హనుమంతుడు సీతను, ఆమె ఉన్న ప్రదేశాన్ని తప్ప మిగిలిన లంకనంతా కాల్చాడు. తరువాత సీత జాడను తెలుసుకొన్న సంతోషవార్తను శ్రీరామునికి వివరించడానికై సముద్రాన్ని దాటి రాముని వద్దకు వచ్చాడు.



८. सोऽभिगम्य महात्मानं कृत्वा रामं प्रदक्षिणम्।
न्यवेदयदमेयात्मा दृष्टा सीतेति तत्त्वतः।।



భావః - ఆ ఆంజనేయుడు మహాత్ముడైన రామునికి భక్తితో ప్రదక్షిణం చేసి "చూశాను సీతను" అని సంక్షిప్తంగా అతనికి తెలిపాడు.

९. ततः सुग्रीवसहितो गत्वा तीरं महोदधेः।
समुद्रं क्षोभयामास शरैरादित्यसन्निभैः।।

భావః- ఆ తర్వాత రాముడు సుగ్రీవసహితుడై రావణునితో యుద్ధానికి బయలుదేరాడు. సముద్రుడున్నచోటికి చేరి లంకకు వెళ్ళడానికి దారి చూపమని కోరాడు. మార్గమీయకుండుటచే కోపించి సూర్యుని వంటి తేజోవంతములైన బాణాలతో సముద్రాన్ని కల్లోల పరిచాడు.




१०. दर्शयामास चात्मानं समुद्रः सरितां पतिः।
समुद्रवचनाच्चैव नलं सेतुमकारयत्।।



భావః– నదీపతి అయిన సముద్రుడు అట్టి రాముని కోపానికి బెదిరి రాముని ఎదుట నిలిచాడు. ఆ సముద్రుని మాట మేరకు రాముడు నలుడను వానరశ్రేష్ఠునిచే సముద్రంపై సేతువు నిర్మింపజేసాడు.

११. तेन गत्वा पुरीं लङ्कां हत्वा रावणमाहवे।
रामस्सीतामनुप्राप्य परां व्रीडामुपागमत्।।



భావః– ఆ వారధిపై సముద్రాన్ని దాటి రాముడు లంకను జేరి యుద్ధంలో రావణుణ్ణి సంహరించాడు. సీతను సమీపించి 'చిరకాలం పరునింట నున్న ఈమె నెలా స్వీకరించగలను' అని ఎంతో సిగ్గుపడ్డాడు.

१२. तामुवाच ततो रामः परुषं जनसंसदि।
अमृष्यमाणा सा सीता विवेश ज्वलनं सती।।



భావః– అంత ఆ రాముడు దేవాదులందరు చూస్తుండగా 'నీవు నేత్రరోగికి దీపం వలె ప్రతికూలురాలవు' అని పరుషంగా మాట్లాడాడు. పతివ్రత అయిన సీత తన భర్త పలికిన కఠోరవాక్కులు సహింపలేక అగ్ని ప్రవేశం చేసింది.


१३. ततोऽग्निवचनात् सीतां ज्ञात्वा विगतकल्मषाम्।
बभौ रामः सम्प्रहृष्टः पूजितः सर्वदैवतैः।।

భావః– ఆ విధంగా సీత అగ్ని ప్రవేశం చేసిన తర్వాత అగ్నిమాటచే సీత ఏ దోషమూ లేనిదని తెలిసికొన్న రాముడెంతో సంతోషించాడు. సర్వదేవతలు అతని ధర్మనిరతిని ప్రశంసించారు.

१४. देवताभ्यो वरं प्राप्य समुत्थाप्य च वानरान्।
अयोध्यां प्रस्थितो रामः पुष्पकेण सुहृद्वृतः।।



భావః– యుద్ధంలో విజయాన్ని చూసి ప్రశంసించడానికి వచ్చిన దేవతల నుండి వరాన్ని పొంది, దాని ప్రభావంతో మృతులైన వానరులను నిద్ర నుండి మేల్కొన్నవాళ్ళలా సజీవులుగా చేసి రావణుని అధీనంలో ఉన్న కుబేరుని పుష్పకవిమానంలో సుగ్రీవ, విభీషణాది మిత్రులతో సహా రాముడు అయోధ్యకు బయలుదేరాడు.



अर्थाः -

१. वानरर्षभः	=	వానరులలో శ్రేష్ఠుడు
२. गृध्रः	=	గద్ద
३. अभिज्ञानम्	=	గుర్తు
५. व्रीडा	=	సిగ్గు
५. पितामहः	=	బ్రహ్మ



भावावगमनम् - प्रतिस्पन्दनम्

१. शृण्वन्तु, विचिन्त्य वदन्तु

अ. पाठ्यांशचित्रे किं किमस्ति?

आ. भवान् कदापि कमपि सन्तोषितवान् वा? कथम्?

इ. हनुमान् कीदृशं कार्यं कृतवान्? किमर्थम्?

२. पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु

अ. श्लोकानां भावान् पठन्तु।

आ. अधः दत्तनि पदानि पाठे अन्विष्य रेखाङ्कितानि कुर्वन्तु। पदकोशं दृष्ट्वा तेषाम् अर्थान् जानन्तु।

वानरर्षभ	समासाद्य	अभिज्ञानम्	हत्वा	शतयोजनविस्तीर्णं
लङ्काम्	अशोकवनिका	दग्ध्वा	महात्मानम्	क्षोभयामास
सेतुम्	सम्प्रहृष्टः	सुहृद्धृतः	अयोध्याम्	अमृष्यमाणा

इ. अर्थानुसारं योजयन्तु।

अ	आ
१. लङ्का	अ. इन्द्रजित्
२. वानरर्षभः	आ. आञ्जनेयः
३. हनुमान्	इ. सीता
४. वैदेही	ई. रावणपट्टणम्
५. रावणपुत्रः	उ. सुग्रीवः

APSCERT

ई. अधः दत्तम् श्लोकं पठित्वा दत्तानां प्रश्नानां समाधानानि लिखन्तु।

परोपकाराय फलन्ति वृक्षाः

परोपकाराय वहन्ति नद्यः

परोपकाराय दुहन्ति गावः

परोपकारार्थमिदं शरीरम्

१. वृक्षाः किमर्थं फलन्ति? .....

२. नद्यः परोपकाराय किं कुर्वन्ति? .....

३. गावः परोपकाराय किं कुर्वन्ति? .....

४. इदं शरीरम् किमर्थम्? .....



भावव्यक्तीकरणम् - सर्जनात्मकता

३. लेखनं, स्वीयरचना

अ. पठन्तु, लिखन्तु

१. किष्किन्धायाः राजा कः?

२. वानरर्षभः कः?

३. सुग्रीवः किमर्थं वानरान् दिशः प्रस्थापयामास?

४. लवणार्णवस्य विस्तीर्णं कियत्?

५. सीता कीदृशी?

६. हनुमान् लङ्कां किं कृतवान्?

आ. चिन्तयन्तु, लिखन्तु

१. एतस्मिन् रामायणे भवतः अभीष्टं पात्रं किम्? किमर्थम्?

२. कार्यसाधने विघ्नाः भवन्ति चेत् भवान्/भवती किं करिष्यति?

AP SCERT

४. सर्जनात्मकव्यक्तीकरणम्

अ. एतां रामायणकथां कथारूपेण लिखन्तु।



१. समानार्थकपदानि

१. जनकात्मजा - जनकस्य पुत्री, जानकी

२. लवणार्णवम् - सागरः, समुद्रः

३. सेतुः - जलबन्धनम्, वारधिः

४. शरः - बाणः, अम्बुः

५. आदित्यः - सूर्यः, भानुः

२. अधो दत्तानि पदानि तेषां विरुद्धार्थकपदैः योजयन्तु

१. बली	( )	अ. शापम्
२. ज्ञात्वा	( )	आ. भीरुः
३. वीरः	( )	इ. अज्ञात्वा
४. पूजितः	( )	ई. बलहीनः
५. वरम्	( )	ऊ. निन्दितः

३. भिन्नम् पदम्

१. अयोध्या, किष्किन्धा, लवणार्णवम्, लङ्का .....

२. ब्रह्मास्त्रम्, रुद्रास्त्रम्, नारायणास्त्रम्, जलबन्धः .....

३. सेतुः, सीता, गीता, नीता .....

४. वैदेही, जानकी, सीता, गौरी .....

५. रावणः, रामः, विभीषणः, कुम्भकर्णः .....

APSCERT

४. पदजालाभिवृद्धिः, भाषाक्रीडाः

अ. रामायणे वर्णितानां सर्वेषां नामानि लिखन्तु। तेषां नाम्नाम् उपयोगं कृत्वा वाक्यरचनां कुर्वन्तु।

उदा - सीतायाः पतिः रामः।

इ. अत्र प्रणवस्य दिनचर्या लिखिता अस्ति। तत् दृष्ट्वा 'तः-पर्यन्तम्' उपयुज्य वाक्यानि लिखन्तु।

समयः	कार्यम्	समयः	कार्यम्
6.00-7.00	योगासनम्	5.00-6.00	क्रीडा
7.30-8.30	गृहपाठः	6.30-8.00	अध्ययनम्
9.00-4.00	विद्यालयः	9.30-5.50	निद्रा

उदा - प्रणवः 6.00 वादनतः 7.00 पर्यन्तं योगासनं करोति।

१. प्रणवः..... गृहपाठं लिखति।

२. ..... विद्यालये पठति।

३. ..... क्रीडति।

४. ..... अध्ययनं करोति।

५. ..... निद्रां करोति।

५. व्याकरणांशाः

अ. एतेषां वाक्यानाम् आधारेण प्रश्नान् लिखन्तु।

१. सुग्रीवः सर्वान् वानरान् समानीतवान्।

प्र. .....

२. सुग्रीवः वानरान् दिशः प्रेषितवान्।

प्र. .....

३. जनकात्मजायाः अन्वेषणार्थं वानराः अगच्छन्।

प्र. .....

४. हनुमान् सप्तमन्त्रिणः पञ्चसेनाग्रगान् मारितवान्।

५. .....

ऊ. हनुमान् लवणार्णवं पुप्लुवे।

६. .....

APSCERT

आ. पाठ्यांशे स्थितानि नामवाचकपदानि लिखन्तु।

इ. अधः दत्तानि विग्रहवाक्यानि अवगच्छन्तु।

१.	जनकात्मजाम्	-	जनकस्य आत्मजाम्	- जानकीम्
२.	वानरर्षभः	-	वानराणाम् ऋषभः इव	- सुग्रीवः
३.	वैदेही	-	विदेहराजस्य अपत्यं स्त्री	- वैदेही
४.	मैथिली	-	मिथिलायाः अपत्यं स्त्री	- मैथिली

ई. तरप्-तमप्

'तरप्-तमप्' प्रत्ययौ अतिशयार्थं सूचयतः। द्वयोः एकस्मिन् अतिशयं दर्शयितुं 'तरप्' प्रत्ययस्य प्रयोगः क्रियते। बहूनाम् एकस्मिन् अतिशयं दर्शयितुं 'तमप्' प्रत्ययस्य प्रयोगः क्रियते। एतौ प्रत्ययौ प्रातिपदिकस्य अन्ते योज्येते।

१. एतानि उदाहरणानि परिशीलयन्तु।

अस्माकं प्राङ्गणे उन्नताः वृक्षाः सन्ति। तेषु आम्रतिन्त्रिणीनारिकेलवृक्षाः 'उन्नततमाः'।

1. आम्रतिन्त्रिणीवृक्षयोः तिन्त्रिणी वृक्षः **'उन्नततरः'**।
   (द्वौ स्तः अतः 'तर' प्रयोगः)
2. आम्रतिन्त्रिणीनारिकेलवृक्षेषु नारिकेलवृक्षः **'उन्नततमः'**।
   (त्रयः सन्ति अतः 'तम' प्रयोगः)

२. पठन्तु, अवगच्छन्तु।

प्रातिपदिकम्	**तरप्प्रत्ययान्तः**	**तमप्प्रत्ययान्तः**
उन्नत	उन्नततर	उन्नततम
प्राचीन	प्राचीनतर	प्राचीनतम
विशाल	विशालतर	विशालतम
सुन्दर	सुन्दरतर	सुन्दरतम
दीर्घ	दीर्घतर	दीर्घतम

३. उदाहरणानुसारम् आवरणात् उचितं पदं चित्वा रिक्तस्थानानि पूरयन्तु।

उदा - अजगजयोः अजः कृशतरः। **(कृशतरः, कृशतमः)**

1. पाण्डवेषु युधिष्ठिरः .....। (गुणवत्तमः, गुणवत्तरः)
2. काकमयूरस्वरयोः काकस्य स्वरः.....। (कर्कशतरः, कर्कशतमः)
3. ग्रहेषु मङ्गलः भूमेः.....। (समीपतरः, समीपतमः)
4. सिंहव्याघ्रचित्रकेषु व्याघ्रः.....। (क्रूरतरः, क्रूरतमः)
5. जनेषु गुणी जनः.....। (विरलतरः, विरलतमः)

भवन्तः स्वविद्यालये कयोरपि द्वयोः, बहुषु एकस्य वा अतिशयं दर्शयितुं 'तरप्, तमप्' प्रत्यययोः उपयोगं कुर्वन्तु।

७. परियोजनाकार्यम्




अ. वर्तमानकाले समुद्रतरणे उपयुज्यमानानां साधनानां चित्राणि सङ्गृह्य शालायां प्रदर्शयन्तु।

चतुर्थीविभक्तिः



महिला



भिक्षुकः




महिला भिक्षुकाय भिक्षां ददाति




अग्रजः



अनुजा




अग्रजः अनुजायै फलं ददाति



पतिः



पत्नी




पतिः पत्न्यै हारं ददाति

चतुर्थीविभक्तिः - बहुवचनरूपाणि

	ए.व	ब.व
१. भिक्षुकः	भिक्षुकाय	भिक्षुकेभ्यः
२. अनुजा	अनुजायै	अनुजाभ्यः
३. पत्नी	पत्न्यै	पत्नीभ्यः

अभ्यासः

उदाहरणानुसारं रिक्तस्थानानि पूरयन्तु-




पक्षिणः
काकः
कोकिलः
शुकः
कपोतः
चटकः
हंसः
कादम्बः
पेंगुइनपक्षी
उलूकः
जतुका
कञ्जलः
श्येनः
गृध्रः
उष्ट्रपक्षी
काष्ठकूटः
मयूरः
मीनरङ्गः
कुक्कुटः
बकः
पक्षः
नखः
पिच्छम्
चञ्चूः

APSCERT

5 तुलसीवृक्षकम्

C3R8I1

अभ्यसनफलितानि

छात्राः तुलस्याः महत्वम् औषधरूपेण कथम् उपकरोति इति ज्ञानं प्राप्नुयुः। C G - 1

केचन औषधयुक्त वृक्षाणामुद्दिश्य मातृभाषायां वदेयुः। C G - 2

पाठ्यभागं स्पष्टतया पठितुं यतेयुः। C G - 3

तुलस्याः प्रयोजनानि लिखितुं समर्थाः भवेयुः। C G - 4

तुलसी सर्वरोगनिवारिणी इत्यंशम् उद्दिश्य सर्जनात्मकतया लिखेयुः। C G - 5


चित्रं पश्यन्तु, चिन्तयन्तु, वदन्तु।



१. चित्रे कस्याः कण्ठे स्टेतस्कोप् अस्ति?

२. कूपीषु किं किं दृश्यते? तेषाम् उपयोगाः के?

३. चित्रे के के वृक्षाः दृश्यन्ते? तेषाम् उपयोगाः के?



भारतीयाः वृक्षानपि देवभावनया पश्यन्ति। वृक्षेषु तुलसीवृक्षकं प्रधानम्। अस्माकं गृहाणां प्राङ्गणेषु साधारणतया तुलसीवृक्षकं दृश्यते एव। भारतीयाः तुलसीं देवताम् इव सम्भाव्य पूजयन्ति, तुलसीदलैः विष्णुम् अर्चन्ति च। तुलसीदलानां छेदनसमये ते ''केशवस्य प्रिये देवि! केशवार्थं लुनामि त्वाम्'' इति प्रार्थयन्ते। तुलसीदलैः कृतेन अर्चनेन भगवान् विष्णुः प्रसन्नः भूत्वा अभीष्टानि ददातीति पुराणानि वदन्ति। देवीभागवते तुलसी'विश्वपावनी' इति नाम्ना वर्णिता अस्ति। तुलसी सर्वमपि पवित्रं करोति इति तस्य अर्थः।

देवस्य तीर्थे तुलसीदलानि मिश्रयन्ति। तादृशस्य प्रसादस्य तीर्थस्य च सेवनेन स्वास्थ्यवृद्धिः भवति।

तुलस्याम् अनेके औषधगुणाः सन्तीति आयुर्वेदज्ञाः प्रतिपादयन्ति। आयुर्वेदग्रन्थेषु तुलस्याः गुणवर्णनपराणि अनेकनामानि सन्ति। तेषु गन्धहारिणी, अमृता, पवित्रपुष्पा, भूतघ्नी इति नामानि प्रसिद्धानि।

पाठस्य चित्रं पश्यन्तु। तत् उद्दिश्य वदन्तु।

प्रतिदिनं भोजनात् पूर्वं तुलसीपत्राणां खादनेन रोगनिरोधक-शक्तिः वर्धते। तुलसीकषायस्य सेवनेन चर्मव्याधयः नश्यन्ति। कण्ठवेदनायां, कण्ठस्वरस्य परिवर्तने च तुलसीदलैः मिश्रितं क्वथितं जलं बहु उपकरोति। एवम् इयं तुलसी बहुविधरोगान् निवारयति। अतः अस्याः ''सर्वरोगनिवारिणी'' इति नाम प्रसिद्धम्।



इत्थं सर्वस्यापि पवित्रीकरणे, वातावरणस्य स्वच्छतायाः सम्पादने, रोगाणां निरोधे, कालुष्यस्य निवारणे च तुलस्याः सामर्थ्यम् अनुपमं खलु!

श्लो।। तुलस्यारोपिता सिक्ता
दृष्टा स्पृष्टा च पालिता।
आरोपिता प्रयत्नेन
चतुर्वर्गफलप्रदा।।



अर्थाः -

१. स्वास्थ्यम्	=	ఆరోగ్యము
२. प्रसिद्धानि	=	పేరుపొందినవి
३. कण्ठवेदना	=	గొంతునొప్పి
५. इत्थम्	=	ఈ విధంగా
५. सामर्थ्यम्	=	శక్తి



भावावगमनम् - प्रतिस्पन्दनम्

१. शृण्वन्तु, विचिन्त्य वदन्तु

१. केषाञ्चन वृक्षाणां नामानि वदन्तु?

२. वृक्षाणाम् उपयोगाः के?

३. गृहे तुलस्याः स्थानं कुत्र?

४. स्नानं कृत्वा कं वृक्षकं जलेन सिञ्चन्ति? किमर्थम्?

२. पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु

अ. अधः दत्तानि पदानि पाठे अन्विष्य रेखाङ्कितानि कुर्वन्तु। पदकोशं दृष्ट्वा अर्थान् जानन्तु।

भारतीयाः	देवभावनया	छेदनसमये	लुनामि	विश्वपावनी
स्वास्थ्यवृद्धिः	औषधगुणाः	आयुर्वेदज्ञाः	गन्धहारिणी	पवित्रपुष्पा
भूतघ्नी	चर्मव्याधयः	सर्वरोगनिवारिणी	पवित्रीकरणे	अनुपमम्

इ. अधः दत्तेषु भिन्नपदं पृथक् कुर्वन्तु।

१. अ. कृष्णतुलसी आ. तुलसीदलम् इ. तुलसीपत्रम् ई. तुलसीकषायः

२. अ. पवित्रपुष्पा, आ. विश्वपावनी, इ. सर्वरोगनिवारिणी ई. अमृतवल्ली

३. अ. देवभावनया पश्यन्ति, आ. दलैः अर्चन्ति,

इ. औषधरूपेण उपयुञ्जते, ई. तोरणेषु बध्नन्ति।

AP SCERT

ई. अधः दत्तम् श्लोकं पठित्वा दत्तानां प्रश्नानां समाधानानि लिखन्तु।

विदेशेषु धनं विद्या
व्यसनेषु धनं मतिः
परलोके धनं धर्मः
शीलं सर्वत्र वै धनम्

विदेशेषु धनं का? .....
व्यसनेषु धनं का? .....
परलोके धनं कः? .....
सर्वत्र धनं किम्? .....



भावव्यक्तीकरणम् - सर्जनात्मकता

३. लेखनं, स्वीयरचना

अ. पठन्तु, लिखन्तु

१. प्रत्येकस्मिन् गृहे विद्यमानं वृक्षकं किम्?
२. तुलसीच्छेदनसमये कं श्लोकं पठन्ति?
३. तुलस्याः अन्यानि नामानि लिखन्तु?
४. तुलसीदलैः किं क्रियते?

आ. चिन्तयन्तु, लिखन्तु

१. तुलस्याः उपयोगः कुत्र भवति?
२. तुलसी कुत्र कुत्र उपयुज्यते?
३. पाठस्य सारांशं स्ववाक्यैः लिखन्तु।
४. तुलस्याः विषये भारतीयानां विश्वासः कः?

APSCERT

४. सर्जनात्मकव्यक्तीकरणम्

अ. पाठस्य आधारेण एकं सम्भाषणं लिखन्तु।



१. समानार्थकपदानि

१. अभीष्टम् - कांक्षा, ईप्सितम्

२. तीर्थम् - जलम्, उदकम्

३. भगवान् - सुरः, देवः

४. सामर्थ्यम् - शक्तिः, बलम्

५. पवित्रम् - पावनम्, पुनीतम्

२. अधो दत्तानि पदानि तेषां विरुद्धार्थकपदैः योजयन्तु

१. अमृता ( ) अ. अप्रधानम्

२. प्रधानम् ( ) आ. अप्रसन्नः

३. प्रसन्नः ( ) इ. मृता

४. अभीष्टम् ( ) ई. अप्रसिद्धानि

५. प्रसिद्धानि ( ) ऊ. अनभीष्टम्

३. भिन्नम् पदम्

१. वृक्षकः, वृक्षः, तरुः, महीरुहः .....

२. अश्वत्थः, तुलसी, वटः, किंशुकः .....

APSCERT

३. तुलसीदलं, तुलसीपुष्पं, तुसीपत्रं, तुलसीकषायः .....

४. पवित्रपुष्पा, विश्वपावनी, अमृतवल्ली, सर्वरोगनिवारिणी .....

५. तुलसीदलैः अर्चयन्ति, देवभावनय पश्यन्ति, औषधरूपेण स्वीकुर्वन्ति, तोरणेषु बध्नन्ति .....

अ. अधः तुलस्याः नामानि सन्ति। अन्विष्य लिखन्तु।

स	पा	वि	प	वि	त्र	पु	ष्पा
र्व	र्प	वि	श्र	पा	व	नी	घ्री
अ	तु	प	मं	रि	*	त	*
न	स	ग	हा	ग	भू	क	अ
*	ग	न्ध	हा	रि	णी	त	मृ
*	ग	प	वि	रा	ख	लु	ता
स	र्व	रो	ग	नि	वा	रि	णी

उदा।। विश्वपावनी

१.....

२.....

३.....


४.....

५.....

६.....

आ. अधः वृक्षस्य वृक्षकस्य च चित्रे दत्ते। तयोः प्रयोजनानि स्वीयवाक्यैः लिखन्तु।





१.

२.

३.

४.

५.

१.

२.

३.

४.

५.

इ. वाक्यानि पठित्वा समुचितं योजयन्तु।



१. जलेन सेचनं कुर्मः।

२. देवम् अर्चामः।



३. दीपाराधनं कुर्मः।

४. गर्तं कृत्वा रोपयामः।



५. औषधरूपेण खादामः।



६. तीर्थे प्रसादे च मिश्रयामः।

७. कषायं कृत्वा पिबामः।

ई. अधः दत्तानि पदानि उपयुज्य वाक्यानि लिखन्तु।

अ. तुलसीदलम् आ. रोगनिरोधकशक्तिः इ. चर्मव्याधिः ई. कालुष्यनिवारणम्

७. परियोजनाकार्यम्

अ. तुलसीसदृशानाम् अन्येषाम् औषधगुणयुक्तानां वृक्षाणां नामानि ज्ञात्वा लिखन्तु।

आ. कस्यापि एकस्य वृक्षस्य उपयोगान् लिखन्तु।



स्वीयमूल्याङ्कनम्



	आम्	न	किञ्चित्
१. पाठं धारालतया पठितुं शक्नोमि ।			
२. दत्तानि भावयुक्तवाक्यानि पाठे अन्वेष्टुं शक्नोमि ।			
३. तुलस्याः उपयोगान् लेखितुं शक्नोमि ।			
४. पाठस्य आधारेण सम्भाषणं लेखितुं शक्नोमि ।			

APSCERT

पञ्चमीविभक्तिः



कृषकः



ग्रामः



कृषकः ग्रामात् आगच्छति




महिला



गोशाला



महिला गोशालायाः आगच्छति




मुनिवरः




नदी



मुनिवरः नद्याः आगच्छति



सिंहः



वनम्



सिंहः वनात् आगच्छति

पञ्चमीविभक्तिः - बहुवचनरूपाणि

	ए.व	ब.व
१. ग्रामः	ग्रामात्	ग्रामेभ्यः
२. गोशाला	गोशालायाः	गोशालाभ्यः
३. नदी	नद्याः	नदीभ्यः
४. वनम्	वनात्	वनेभ्यः

अभ्यासः

उदाहरणानुसारं पञ्चम्यन्तपदैः रिक्तस्थानानि पूरयन्तु ।



उदा – सेवकः गहात बहिः तिष्ठति । (गृहम्)




1. नदी _____ प्रवहति । (पर्वतः)



2. बालकः _____ पतति । (दिचक्रिका)



3. वीरः _____ बाणं क्षिपति । (कार्मुकः)



4. रमेशः _____ आगच्छति । (काशी)





5. सेविका _____ उपायनं गृह्णाति । (राज्ञी)

उदाहरणानुसारं पञ्चम्यन्तपदैः रिक्तस्थानानि पूरयन्तु ।

उदा – बालिका शयनात् पूर्व देवं नमस्करोति । (शयनात् (एकव))

उदा – अजगराः बिलेभ्यः आगच्छन्ति । (बिल(बहुव))



1. देवदत्तः अध्यापकेभ्यः बिभेति । (अध्यापकः(बहुव))



2. मालाकाराः _____ पुष्पं चिनोति । (लता(बहुव))



3. छात्रः _____ पुस्तकं पठति । (शिक्षिका(एफव))





4. अङ्गुलीयानि _____ पतन्ति । (अङ्गुली (बहुव.))




5. शिशुः _____ पतति । (दोला(एक्व))



6. नारिकेलतैलं _____ निस्सरति । (कृपी(एक्व.))

बहिः, आरभ्य, पूर्वम्, परम् इति एतेषां शब्दानां प्रयोगे पञ्चम्याः प्रयागाः

उदाहरणानुगुणं वाक्यानि रचयन्तु-



बहिः-

1. ....ग्रामात्.... बहिः विद्यालयः अस्ति।
2. _____ बहिः मन्दिरम् अस्ति।
3. .... वृक्षः .....।
4. .... अजा चरति।
5. .... वृषभः निद्राति।

(ग्रामः)
(नगरम्)
(क्षेत्रम्)
(गुहम्)
(मन्दिरम्)

. आरभ्य-

6. ..सोमवासरात्... आरभ्य कक्ष्या भविष्यति।
7. .... नगरसीमा अस्ति।
8. .... गृहे यावत् उद्यान निर्मातु।
9. .... कन्याकुमारीं यावत् भारतदेशः।
10. .... शयनें यावत् कार्य करोतु।



(सोमवासरः)
(नदी)
(मार्ग)
(हिमालयः)
(उत्यानम्)

I. पूर्वम्-

11. नगरात् ... पूर्व ग्रामः अस्ति।
12. .... शनिवासरः।
13. .... मां पश्य।
14. .... शान्तिमन्त्रं वदामः।
15. .... देव समारम।


(नगरम्)
(रविवासरः)
(गमनम्)
(भोजनम्)
(शयनम्)

V. परम्-

16. ....मासात्.... परं परीक्षा अस्ति।
17. .... सोमवासरः भवति।
18. .... जलं न पिबत।
19. .... किञ्चत् क्रीडत।
20. .... मां मिलतु।

(मासः)
(रविवासरः)
(भोजनम्)
(पतनम्)
(आगमनम्)

APSCERT


पशवः
सिंहः
व्याघ्रः
भल्लुकः
चित्रकः
शृगालः
उष्ट्रः
गर्दभः
धेनुः
अश्वः
सूकरः
मृगः
अजः
मेषः
कुक्कुरः
शल्यकः
बिडालः
गण्डकः
गजः
महिषः
करियादः
वानरः
चित्रोष्ट्रः
चित्रास्सभः
नकुलः
शशः
मूषकः
चिक्रोडः

6 लोकसेवनम्

Z5K3I9

अभ्यसनफलितानि

छात्राः रामायणमहाकाव्यात् कार्यसाधने दक्षतायाः प्राधान्यं अधिकृत्य ज्ञानं लभेयुः। C G - 1

हनूमतः स्वामिभक्तिनम् उद्दिश्य मातृभाषया वक्तुं प्रभवेयुः। C G - 2

श्लोकान् कण्ठस्थीकर्तुं भवेयुः। C G - 3

श्लोकानां भावलेखने समर्थाः भवेयुः। C G - 4

कथारूपेण मातृभषया लिखितुं यत्नं कुर्युः। C G - 5

चित्रं पश्यन्तु, चिन्तयन्तु, वदन्तु।









१. चित्रे के सन्ति? ते किं कुर्वन्ति?

२. ईदृशं दृश्यं भवान् कदापि दृष्टवान् वा?

३. सामाजिकविपत्तिषु कीदृशं साहाय्यं कर्तुं शक्यते?



पाठस्य चित्रं पश्यन्तु। तत् उद्दिश्य वदन्तु।


जीवनस्य लक्ष्यमेव लोकसेवनव्रतम्।
सेवया हि जीवनं सार्थकं फलान्वितम् ।। जीवनस्य।।

अन्धकारजीवने दीपमुद्दीपयाम
क्लेशबहुलवीथिकाकण्टकान्युत्खनाम
त्रस्तदीनबान्धवान् हस्तलम्बमुन्नयाम
न्यूनता यत्र यत्र तत्र सत्वरं हि याम।। जीवनस्य।।






प्रतिजनं प्रतिदिनं ध्येयमारोपयाम
श्रद्धया विशुद्धया दीनदेवमर्चयाम
स्वार्थभावनां विना सर्वमपि समर्पयाम
जनहितं वरप्रदं हृदि चिरं स्थापयाम ।। जीवनस्य।।



लोकसेवनं ध्रुवं दैवसमाराधनम्
दीनबन्धुसेवनान्नास्ति परं पुण्यदम्
कार्यतत्परा वयं साधयाम दिग्जयम्
वर्धतां समेधताम् ऋद्धिमद्धि भारतम् ।। जीवनस्य।।

- श्री जनार्दन हेग्डे



अर्थाः -

१.	लक्ष्यम्	=	ఆశయము
२.	सार्यकम्	=	ఫలవంతం
३.	कण्टकानि	=	ముళ్ళు
५.	हस्तलम्बम्	=	చేయూత
५.	न्यूनता	=	తక్కువతనం



भावावगमनम् - प्रतिस्पन्दनम्

१. शृण्वन्तु, विचिन्त्य वदन्तु

अ. गीतं गायन्तु।

आ. दीनजनसेवनं किमर्थं करणीयम्?

इ. दीनजनान् सेवितवताम् उत्तमपुरुषाणां नामानि वदन्तु ।

ई. भवन्तः दीनजनानां साहाय्यं कर्तुम् इच्छन्ति चेत् कथं कर्तुम् इच्छन्ति?

२. पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु

अ. पठन्तु, अवगच्छन्तु

జీవితానికి లక్ష్యం లోకానికి సేవ చేయడమే. సేవ చేయడం వలన జీవనం సార్థకమౌతుంది. ఫలవంతమౌతుంది.

చీకటితో నిండిన జీవితంలో దీపం వెలిగిద్దాం. ఎన్నో దుఃఖాలతోనున్న మార్గంలోని ముళ్ళను ఏరివేద్దాం. బాధలోనున్న దీనజనులకు సహాయహస్తాన్నందిద్దాం. ఎక్కడ లోపం ఉన్నా సవరించడానికి అక్కడికి త్వరగా వెళ్దాం.

ప్రతిరోజు ప్రతిఒక్కరికి ధ్యేయాన్ని గుర్తు చేద్దాం. శ్రద్ధతో స్వచ్ఛమైన మనస్సుతో దీనజనులలోనున్న దేవుని పూజిద్దాం. స్వార్థాన్ని వదలి సర్వస్వం సమర్పిద్దాం. చిరకాలం, జనులకు మంచి చేయడమే వరమని మనస్సుల్లో నిలుపుకుందాం.

జనులకు సేవచేయడమే దేవుని పూజించడం. ఇది సత్యం. దీనజనులకు సేవచేయడాన్ని మించిన పుణ్యం మరొకటి లేదు. కార్యతత్పరులమైన మనం విజయాన్ని సాధిద్దాం. తెలివితో వృద్ధి చెందుదాం. భారతదేశాన్ని ప్రగతిబాటలో నడిపిద్దాం.

AP SCERT

आ. गीतस्य भावं वदन्तु।

१. अधः दत्तानि पदानि गीते अन्विष्य तेषामधः रेखाङ्कनं कुर्वन्तु। पदकोशं दृष्ट्वा तेषाम् अर्थान् जानन्तु।

सार्थकम्	हृदि	ऋद्धि	लोकसेवनम्
श्रद्धया	उद्दीपयाम	न्यूनता	वरप्रदम्
पुण्यदम्	सत्वरम्	जनहितम्	लक्ष्यमेव

२. मञ्जूषातः समुचितपदानि चित्वा रिक्तस्थानानि पूरयन्तु।

हृदि, सत्वरं, ध्येयम्, दीनदेवम्, दीपम्

१. प्रतिजनं प्रतिदिनं..... आरोपयाम।

२. अन्धकारजीवने..... उद्दीपयाम।

३. जनहितं वरप्रदं..... चिरं स्थापयाम।

४. न्यूनता यत्र यत्र तत्र ..... हि याम।

५. श्रद्धया विशुद्धया..... अर्चयाम।

३. अधः दत्तम् गद्यांशं पठित्वा दत्तानां प्रश्नानां समाधानानि लिखन्तु।

पिबन्ति नद्यः स्वयमेव नाम्भः
स्वयं न खादन्ति फलानि वृक्षाः।
नादन्ति सस्यं खलु वारिवाहाः
परोपकाराय सतां विभूतयः

१. नद्यः किं कुर्वन्ति? .....

२. वृक्षाः कानि न खादन्ति? .....

३. वारिवाहाः किं कुर्वन्ति? .....

४. सतां विभूतयः किमर्थम्? .....

AP SCERT



भावव्यक्तीकरणम् - सर्जनात्मकता

३. लेखनं, स्वीयरचना

अ. पठन्तु, लिखन्तु

१. अस्माकं जीवनलक्ष्यं किम्?

२. किं कुर्मः चेत् जीवनं सार्थकं भवति?

३. प्रतिजनं हृदि कीदृशं ध्येयं स्थापनीयम्?

४. लोकसेवनं कीदृशम्?

५. लोकसेवनार्थं किं करणीयम्?

६. कीदृशं जीवनम् आदर्शमयं भवति?

अ. चिन्तयन्तु, लिखन्तु

१. भवतः चिन्तनानुगुणं सप्त सेवाकार्याणि लिखतु।

२. भवान्/भवती कदापि कस्यचित् साहाय्यं कृतवान्/कृतवती चेत् लिखतु।

३. एतस्य पाठस्य पठनानन्तरं कीदृशं साहाय्यं कर्तुम् इच्छति इति लिखतु।

४. सर्जनात्मकव्यक्तीकरणम्

अ. महेशः स्वीयजन्मदिनसन्दर्भे मधुरं वितरीतुम् एकम् अनाथाश्रमं गच्छति। तत्र भानुः नाम बालकः रुदन् दृश्यते। महेशः तस्मै मधुरं यच्छति। तस्मिन् सन्दर्भे प्रचलितं तयोः सम्भाषणम् ऊहित्वा लिखन्तु।



© SCERT AP



१. समानार्थकपदानि

१. सत्वरम् - शीघ्रम्

२. ध्येयम् - लक्ष्यम्

३. दीनदेवः - दरिद्रवान्

४. स्वार्थभावना - स्वीयप्रयोजनम्

५. जनीहतम् - प्रजाश्रेयः

२. अधो दत्तानि पदानि तेषां विरुद्धार्थकपदैः योजयन्तु

१. लोकसेवनम्	( )	अ. अस्ति
२. न्यूनता	( )	आ. अश्रद्धया
३. श्रद्धया	( )	इ. लोकपीडनम्
४. स्वार्थः	( )	ई. अधिकता - पूर्णता
५. नास्ति	( )	ऊ. निस्स्वार्थः

३. भिन्नम् पदम्

१. लोकसेवनम्, लोकपीडनम्, लोककण्टकम्, लोकबाधनम् .....

२. उद्दीपयाम, उन्नयाम, आरोपयाम, वर्धताम् .....

३. अत्र, तत्र, सदा, यत्र .....

४. दीनदेवः, दरिद्रदेवः, दरिद्रनारायणः, धनिकनारायणः .....

५. स्वार्थभावना. त्यागभावना, प्रेमभावना, स्नेहभावना .....

AP SCERT

पदजालाभिवृद्धिः, भाषाक्रीडाः

अ. अधः दत्तानि पदानि उपयुज्य स्वीयवाक्यानि लिखन्तु।

अ. सार्थकम्	आ. सत्वरम्	इ. चिरम्
ई. साधयाम	उ. श्रद्धया	ऊ. न्यूनता
ऋ ध्येयम्	ए. प्रतिदिनम्	ऐ. लोकसेवा

आ. पाठे दृष्टानि अनुस्वारान्तपदानि अन्विष्य अधः लिखन्तु।

व	र	प्र	दं	स	कं
लो	धृ	वं	स	र्थ	ज
प	क	त्व	सा	प्र	न
चि	रं	से	यं	ति	हि
जी	व	नं	व	ज	तं
नं	प्र	ति	दि	नं	व

उदा - सार्थकम्

१.....

२.....

३.....

४.....

५.....

६.....

७.....

८.....

९.....

१०.....

इ. अधः दत्तानि रेखाङ्कितपदानि अवगच्छन्तु। (विना -द्वितीया)

१. जलं विना मत्स्यः न जीवति ।

२. प्राणवायुं विना मनुष्यः न जीवति ।

३. सूर्यं विना जनजीवनं न भवति ।

४. इन्धनतैलं विना वाहनं न चलति ।

५. वृक्षान् विना शुद्धवायुः नास्ति ।

+ अत्र विना योजनेन द्वितीयाविभक्तिः भवति।

ई. अधः दत्तानां पदानां साहाय्येन 'विना' इति अव्ययम् उपयुज्य वाक्यानि लिखन्तु।

१. माता, पुत्रः .....

२. चन्द्रः, औषधम् .....

३. जलं, जीवनम् .....

४. सुखं, दुःखम् .....

५. लवणं, खाद्यम् .....

६. अभ्यासः, शास्त्रम् .....

सम्भाषणम्

यदा - तदा

१. यदा मेघः गर्जति तदा वृष्टिः भवति।

२. यदा कर्षकः बीजं वपति तदा सस्यम् उद्भवति।

३. यदा वृष्टिः भवति तदा कर्षकः बीजं वपति।

४. यदा सस्यवृद्धिः भवति तदा कर्षकः सस्यं कर्तयति।

५. यदा धान्यं विक्रीणाति तदा धनम् प्राप्नोति।

६. यदा धनं पश्यति तदा कर्षकस्य मुखे आनन्दः भवति।

यदा-तदा इति अव्यये उपयुज्य आवरणस्थानां पदानां साहाय्येन वाक्यनिर्माणं कुर्वन्तु।

१. अधिकाङ्काः कदा प्राप्यन्ते? (परिश्रमः)

२. भोजनं रुचिकरं कदा भवति? (लवणम्)


३. प्रकाशः कदा भवति? (सूर्यः उदेति)

४. उद्योगं कदा प्राप्नोति? (परीक्षाम् उत्तरति)


५. उत्तमनागरिकः कदा भवति? (समाजसेवां करोति)

APSCERT

षष्ठीविभक्तिः



१.	भारतदेशः	भरतदेशस्य	राजधानी देहली
२.	आन्ध्रप्रदेशः	आन्ध्रप्रदेशस्य	राजधानी अमरावती।
३.	केरला	केरलायाः	राजधानी तिरुवनन्तपुरम्।
४.	कर्णाटका	कर्णाटकायाः	राजधानी बेङ्गलूरु।
५.	राजस्थान्	राजस्थानस्य	राजधानी जैपूर।



रामः

उदा - दशरथस्य (दशरथः) पुत्रः

..... (सुग्रीवः) .....

..... (लक्ष्मणः) .....

..... (कौसल्या) .....

षष्ठीविभक्तिः - बहुवचनरूपाणि

	ए.व	ब.व
१. भारतदेशः	भारतदेशस्य	भारतदेशानाम्
२. केरला	केरलायाः	केरलाणाम्
३. कर्णाटका	कर्णाटकायाः	कर्णाटकानाम्
४. राजस्थान्	राजस्थानस्य	राजस्थानानाम्
५. सुग्रीवः	सुग्रीवस्य	सुग्रीवाणाम्
६. लक्ष्मणः	लक्ष्मणस्य	लक्ष्मणानाम्
७. कौसल्या	कौसल्यायाः	कौसल्यानाम्

अभ्यासः

कोष्ठगतशब्दानां षष्ठ्यन्त रूपैः उदाहरणानुगुणं रिक्तस्थानानि पूरयन्तु-






1. स्वागतकारिणी	.....	स्वागतं करोति।	(जनाः)
2. पडिडतः	.....	रचनां करोति।	(ग्रथ्थाः)
3. वनपालकः	.....	रक्षणं करोति।	(वृक्षाः-वृक्षाणाम्)
4. मालाकारः	.....	ग्रथनं करोति।	(पुष्पमालाः)
5. जनाः	.....	पठनं कुर्वन्ति।	(पत्रिकाः-पत्रिकाणाम्)
6. अधिकारी	.....	परिशीलनं करोति।	(सच्चिकाः)
7. ते	.....	सम्मानं कुर्वन्ति।	(नर्तक्क-नर्तकीनाम्)
8. अर्चचाः	.....	पूजां कुर्वन्ति।	(देवाः)
9. भारतीयाः	.....	पूजां कुर्वन्ति।	(नयः)
10. वीरण्णू	.....	दन्तानू चोरयति।	(गजाः)
11. दुर्जनाः	.....	वच्चनं कुर्वन्ति।	(सज्जनाः)
12. सा	.....	मेलनार्थम् अगच्चत्।	(सख्यः)
13. कृष्णः	.....	परिपातकः।	(शिष्टाः)
14. संस्कृतभाषा	.....	जननी।	(भारतीयभाषा-भारतीयभापाणाम्)
15. गणेशः	.....	अधिपतिः।	(गणाः)
16. शुक्रावार्यः	.....	गुरुः।	(राक्षसाः)
17. ब्रहस्पतिः	.....	गुरुः।	(देवाः)
18. वृक्षस्य	.....	कर्तनं न करोतु।	(शाखाः)
19. भवानू	.....	वचनम् अनुसरतु।	(ज्येष्ठाः)
20. भवती	.....	प्रक्षालनं करोतु।	(पात्राणि-पात्राणाम्)



APSCERT



७. परियोजनाकार्यम्

अ. महनीयानां (समाजसेवकानां) नामानि सङ्कलन्तु। तेषाम् उत्तमानि कार्याणि भित्तिपत्रिकायां लिखित्वा आनयन्तु।



स्वीयमूल्याङ्कनम्



	आम्	न	किञ्चित्
१. गीतं सरागभावं गातुं शक्नोमि ।			
२. लोकसेवनार्थं किं करणीयमिति वक्तुं शक्नोमि।			
३. सप्तसेवाकार्याणि लेखितुं शक्नोमि ।			
४. सूचनानुसारं सम्भाषणं लेखितुं शक्नोमि।			

7 नाडीजङ्घः

F1C5E4

अभ्यसनफलितानि

छात्राः कथा श्रवणे रताः भवेयुः। C G - 1

पाठ्यभागस्य सारांशं मातृभाषया वक्तुं प्रभवेयुः। C G - 2

पाठ्यभागं स्पष्टतया पठितुं यतेयुः। C G - 3

नाडीजङ्घस्य स्वभावं उद्दिश्य लेखने समर्थाः भवेयुः। C G - 4

कृतज्ञता सूचकां अन्यां कथां मातृभाषया स्वीयवाक्यैः लिखेयुः। C G - 5

चित्रं पश्यन्तु, चिन्तयन्तु, वदन्तु।




१. चित्रं दृष्ट्वा कथां वदन्तु?
२. कृषकः केन भावेन सर्पं रक्षति?
३. सर्पः किं न स्मरति?

पाठस्य चित्रं पश्यन्तु। तत् उद्दिश्य वदन्तु।

एकस्मिन् गहनारण्ये कस्मिँश्चित् वटवृक्षे नाडीजङ्घः नाम गृध्रः प्रतिवसति स्म। सः सकलगुणसम्पन्नः दैवभक्तश्च। सः प्रतिदिनं भक्त्या विधातारम् अर्चति स्म।

एकदा सः यथाविधि विधातारं पूजयित्वा सायं समये स्वनिवासम् आगच्छत्। तत्र वटवृक्षमूले सः एकम् अपरिचितं युवकम् अपश्यत्। सः युवकः क्षतगात्रः, अत्यन्तं परिश्रान्तः इव च दृश्यते स्म। तादृशं युवकं दृष्ट्वा नाडीजङ्घस्य हृदयम् आर्द्रम् अभवत्। सः तं युवकम् इत्थम् अपृच्छत् - ''भवान् कः? भवतः ईदृशी स्थितिः कथम् अभवत्? मम नाम नाडीजङ्घः, एषः मम निवासः। भवान् अत्र निर्भयं तिष्ठतु'' इत्युक्त्वा नाडीजङ्घः स्वपक्षाभ्यां तस्य श्रमम् अपनीय खादितुं कानिचन फलान्यपि तस्मै अयच्छत्।



सः युवकः सदैन्यं ''हे श्रेष्ठ! भवतः आतिथ्येन मम श्रमः अपगतः। भवतः आत्मीयभाषणं मम सर्वं श्रमम् अपनीय धैर्यम् अदात्। मम नाम गौतमः। अहं निर्धनः। धनार्जनार्थम् अहं केनचित् वणिक्समूहेन सह ग्रामान्तरं गच्छामि स्म। अरण्यमार्गे एकः उन्मत्तः गजः अस्माकं समूहम् आक्रम्य बहून् अमारयत्। अहं तु स्वल्पाघातैः ततः आत्मानं रक्षन् पलायनं कृत्वा अत्र आगच्छम्। यत्र कुत्रापि किञ्चित् धनलाभः भवति चेत् मम जीवनं सुखमयं भवेत् इति चिन्तयामि'' इत्यवोचत्।


तस्य दीनालापं श्रुत्वा नाडीजङ्घः - ''मित्र ! दैन्यं त्यजतु। मम स्नेहितः

विरूपाक्षः नाम राक्षसराजः समीपस्थस्य राज्यस्य मधुव्रजस्य महाराजः अस्ति। प्रातः तस्य समीपं गत्वा आत्मानः परिचयं कृत्वा मम नाम वदतु। भवतः कार्यसिद्धिः अवश्यमेव भविष्यति '' इति तस्मै युवकाय आश्वासनम् अयच्छत्।


वस्तुतः गौतमः ब्राह्मणः। परन्तु नीचस्वभावः। सः मधुमांसादिकं भक्षयन् भ्रष्टाचारी भूत्वा किरातकैस्सह सञ्चरन् प्रमादवशात् नाडीजङ्घस्य समीपम् आगच्छत्।

अनन्तरदिने गौतमः प्रातः उत्थाय नाडीजङ्घस्य सूचनानुसारं मधुव्रजराज्यं गत्वा विरूपाक्षं स्वदैन्यवृत्तान्तं न्यवेदयत्। सः महाराजः मित्रस्य नाडीजङ्घस्य वचने विश्वस्य गौतमाय भारवहनमितं धनं, सुवर्णं च अयच्छत्।

धनसुवर्णलाभेन नितरां सन्तुष्टः गौतमः सायङ्काले नाडीजङ्घम् उपागच्छत्। सः नाडीजङ्घं सर्वं वृत्तान्तं निवेद्य रात्रौ तत्रैव निद्राणवान्। मध्यरात्रे उत्थाय गौतमः ततः प्रस्थानं करणीयम् इति निश्चयं कृत्वा 'पाथेयार्थं किं नयामि' इति अचिन्तयत्। तस्य दृष्टिः नाडीजङ्घे अपतत्। सः कृतघ्नः गौतमः कृतोपकारं विस्मृत्य नाडीजङ्घं निर्दयं हत्वा तस्य मांसं गृहीत्वा ततः निरगच्छत्।



बहुदिनेभ्यः स्वसमीपम् अनागतं स्वमित्रं नाडीजङ्घं चिन्तयन् विरूपाक्षः तस्य अन्वेषणार्थं स्वपुत्रं प्रैषयत्। ज्ञातवृत्तान्तः तस्य पुत्रः गौतमं



बद्ध्वा स्वपितृसमीपम् अनयत्। क्रुद्धः सः राक्षसराजः ''एतं कृतघ्नं गौतमं खण्डखण्डशः कृत्वा काकेभ्यः क्षिपन्तु इति समाज्ञापयत्।

विरूपाक्षः स्वमित्रस्य नाडीजङ्घस्य अन्तिमसंस्कारम् आरब्धवान्। तत् द्रष्टुं देवाः अपि तत्र उपस्थिताः आसन्। तदानीं कामधेनोः क्षीरस्य बिन्दवः नाडीजङ्घस्य चितौ अपतन्। कामधेनोः क्षीरस्य प्रभावेण नाडीजङ्घः पुनरुज्जीवितः।

नाडीजङ्घः देवान् कामधेनुं च नत्वा 'कृतघ्नं गौतमम् अभाग्यं' मत्वा तमपि पुनर्ज्जीवयन्तु इति देवान् प्रार्थयत्। देवाः अपि तस्य निःस्वार्थवचनैः सन्तुष्टाः भूत्वा गौतमं पुनर्जीवितम् अकुर्वन्।

अपकारिणः अपि उपकारं कृतवान् नाडीजङ्घः धन्यः खलु?

श्लो।। उपकारिषु यस्साधुः साधुत्वे तस्य को गुणः।

अपकारिषु यस्साधुः स साधुस्सद्भिरुच्यते।।

अर्थाः -

१. गहनारण्यम्	=	దట్టమైన అడవి
२. वटवृक्षः	=	మర్రిచెట్టు
३. विधाता	=	బ్రహ్మ
५. क्षतगात्रः	=	దెబ్బలు తగిలినవాడు
५. परिश्रान्तः	=	మిక్కిలి అలసినవాడు



भावावगमनम् - प्रतिस्पन्दनम्

१. शृण्वन्तु, विचिन्त्य वदन्तु

१. कथां स्वीयवाक्यैः वदन्तु।

२. कथायां कति पात्राणि सन्ति?

३. पाठे किं पात्रं भवान् अधिकम् इच्छति? किमर्थम्?

२. पठन्तु, अवगच्छन्तु, व्यक्तीकुर्वन्तु

अ. अधः दत्तानि वाक्यानि कथानुक्रमेण लिखन्तु।

१. मधुव्रजराज्यं गत्वा विरूपाक्षं स्वदैन्यवृत्तान्तं न्यवेदयत्।

२. नाडीजङ्घं निर्दयं हत्वा, मांसं गृहीत्वा गतवान्।

३. किञ्चित् धनलाभः भवति चेत् मम जीवनं सुखमयं भवेत्।

४. कृतघ्नं गौतमम् अभाग्यं मत्वा तमपि पुनरुज्जीवयन्तु।

५. तस्य दृष्टिः नाडीजङ्घे अपतत्।

६. कामधेनोः क्षीरस्य प्रभावेण नाडीजङ्घः पुनरुज्जीवितः।

आ. अधः दत्तं श्लोकं पठित्वा दत्तानां प्रश्नानां समाधानानि लिखन्तु।

पद्माकरं दिवकरो विकचं करोति

चन्द्रोविकासयति कैरवचक्रवालम्।

नाभ्यर्थितो जलधरोपि जलं ददाति

सन्तः स्वयं परहिते विहिताभियोगाः

१. पद्माकरं कः विकचं करोति? .....

२. चन्द्रः कं विकासयति? .....

३. कः जलं ददाति? .....

४. स्वयं परहिते विहिताभियोगाः के? .....

AP SCERT



भावव्यक्तीकरणम् - सर्जनात्मकता

३. लेखनं, स्वीयरचना

अ. पठन्तु, लिखन्तु

१. अस्मिन् पाठे स्नेहितौ कौ?

२. गौतमेन कृतम् अकार्यं किम्?

३. नाडीजङ्घः गौतमाय किम् उपकारं कृतवान्?

४. कीदृशं युवकं दृष्ट्वा नाडीजङ्घस्य हृदयम् आर्द्रम् अभवत्?

५. नाडीजङ्घः देवतां किं प्रार्थयत्?

आ. चिन्तयन्तु, लिखन्तु

१. विरूपाक्षः किमर्थं गौतमाय दण्डनं दत्तवान्?

२. नाडीजङ्घः कीदृशः?

४. सर्जनात्मकव्यक्तीकरणम्

अ. एतां कथां सम्भाषणरूपेण लिखन्तु।



भाषांशः

५. पदजालाभिवृद्धिः

१. समानार्थकपदानि

१. आर्द्रम् - द्रवीभूतम्

२. वणिक् - व्यापारी

३. दीनालापम् - दैन्यभाषणम्

४. स्वार्थभावना - फलप्राप्तिः

AP SCERT

२. अधो दत्तानि पदानि तेषां विरुद्धार्थकपदैः योजयन्तु

१. अपरिचितः	( )	अ. कृतज्ञः
२. निर्भयम्	( )	आ. अधिकम्
३. धैर्यम्	( )	इ. परिचितः
४. स्वल्पम्	( )	ई. अधैर्यम्
५. कृतघ्नः	( )	ऊ. भयम्

३. भिन्नम् पदम्

१. अर्चनम्, पूजनम्, वन्दनम्, पीडनम्	.....
२. धेनुः, गजः, गृध्रः, चित्रकः	.....
३. कठिनम्, आर्द्रम्, क्रूरम्, क्रुद्धम्	.....
४. श्रेष्ठः, नीचः, दुष्टः, दुर्बुद्धिः	.....
५. प्रातः, प्रभातः, उषोदयः, निशा	.....

दीर्घासंख्या

1947 – सप्तचत्वारिंशत् अधिक नवदशशतम्

1950 – पञ्चाशत् अधिक नवदशशतम्

వివరణమ్ – తెలుగులో కాని ఆంగ్లంలో కాని సంఖ్యలను పెద్దస్థానం నుంచీ ప్రారంభించి ఒకటిస్థానంతో పూర్తి చేస్తారు

	. 1	9	4	7
	వేలస్థానం	వందలస్థానం	పదులస్థానం	ఒకట్లస్థానం ఒకట్ల
తెలుగులో	పంతొమ్మిది	వందల	నలభై	ఏడు
అంగ్లంలో	NINETEEN	HUNDRED	AND FORTY	SEVEN

संस्कृतभाषायां – प्रथमस्थानात् आरभ्य दश, शत, सहस्र, लक्षादिक स्थानान्तं संख्यां वदन्ति।

अभ्यासः

अधः दत्ताः संख्याः उपरितन विवरणानुसारं संस्कृतभाषया लिखन्तु।

1. 1952 –
2. 1757 –
3. 1882 –
4. 6324 –
5. 2026 –
6. 2004 –
7. 1998 –
8. 1983 –
9. 1961 –
10. 1975 –

सम्भाषणम्

चित् - चन

आ. उदाहरणवाक्येषु रेखाङ्कितानि पदानि पठन्तु। अध्यापकस्य साहाय्येन अवगच्छन्तु।

उदा - १. किञ्चित् कारणम् अस्ति।
कानिचित् कारणानि सन्ति

२. कश्चन बालकः धावति।
केचन बालकाः धावन्ति।

३. काचन महिला आगच्छति।
काश्चन महिलाः आगच्छन्ति।

AP SCERT

इ. समुचितानि पदानि चित्त्वा समुचितपट्टिकायाम् योजयन्तु।

कथा, भिन्नानि, मधुरफलम्, गुणाः, भक्ताः, चित्राणि, कक्ष्या, पुत्राः, चित्रम्, कक्ष्याः, लता, मालाः, वस्त्रम्, युवकाः, भिन्नम्, युवकः, वस्त्राणि, माला, गुणाः, मधुरफलानि, भक्ताः, लताः, कथा, पुत्रः

किञ्चित्	कानिचित्
कञ्चन	केचन
काचन	काञ्चन

ई. ऋकारान्तशब्दाः

केशवः सप्तमकक्ष्यायां पठति। केशवस्य गृहे तस्य पिता, माता, भ्राता, च सन्ति। तस्य भ्राता पञ्चमकक्ष्यायां पठति। तस्य पिता ग्रामस्य नेता च। केशवः प्रतिदिनं मातरं पितरं च नमति। भ्रातरं नीत्वा शालां गच्छति। भ्रात्रा सह खेलति। मात्रा सह आपणं गच्छति। पित्रा सह भोजनं करोति। सः भ्रात्रे स्वक्रीडनकानि ददाति। मात्रे औषधं ददाति। पित्रे स्वगृहकार्यं दर्शयति।

उ. एतेषु वाक्येषु पिता माता, भ्राता, इत्येतानि पदानि सन्ति। तेषां सम्बद्धानि क्रमेण अत्र लिखन्तु।

माता,	पिता,	भ्राता	
.....	.....	.....	
.....	.....	.....	एतानि ऋकारान्तशब्दरूपाणि।
.....	.....	.....	

सप्तमीविभक्तिः



नीडः



वृक्षः



नीडः वृक्षे अस्ति



महिला



पाकशाला



महिला पाकशालायां पचति।



फलानि



स्थाली



फलानि स्थाल्याम् अस्ति

सप्तमीविभक्तिः - बहुवचनरूपाणि

	ए.व	ब.व
१. वृक्षः	वृक्षे	वृक्षेषु
२. पाठशाला	पाठशालायाम्	पाठशालासु
३. स्थाली	स्थाल्याम्	स्थालीषु

अभ्यासः

प्रश्नः		उत्तरम्
1. छात्राः कुत्र पठन्ति ?	 (विद्यालयः)	.विद्यालये.....।
2. अध्यापकाः कुत्र पठन्ति ?	(पुस्तकालयः)	.....।
3. कृषकाः कुत्र वसन्ति ?	 (ग्रामः)	.....।
4. बालकाः कुत्र क्रीडन्ति ?	 (क्रिडाङ्गणम्)	.....।
5. आपणिकः कुत्र विक्रयणं करोति ?	(आपणः)	.....।
6. ग्रामीणाः कुत्र स्नान्ति ?	 (कूपः)	.....।
7. मयूराः कुत्र नृत्यन्ति ?	(वनम्)	.....।
8. अश्वाः कुत्र तिष्ठन्ति ?	 (अश्वशाला)	.....।
9. गजाः कुत्र तिष्ठन्ति ?	(गजशाला)	.....।
10. जनाः कुत्र स्नान्ति ?	 (नदी)	.....।
11. भक्ताः कुत्र स्नान्ति ?	(गङ्गा)	.....।
12. वाहनानि कुत्र सञ्चरन्ति ?	 (मार्गः)	.....।
13. पक्षिणः कुत्र निवसन्ति ?	(नीडः)	.....।
14. मृगाः कुत्र निवसन्ति ?	 (वनम्)	.....।
15. दन्ताः कुत्र सन्ति ?	(मुखम्)	.....।
16. शिशुः कुत्र निद्राति ?	 (प्रेङ्खा)	.....।
17. लोकसभा कुत्र अस्ति ?	 (देहली)	.....।
18. मौक्तिकानि कुत्र सन्ति ?	(सागरः)	.....।
19. फलं कुत्र अस्ति ?	 (वृक्षः)	.....।
20. कृषकः कुत्र कार्यं करोति ?	 (क्षेत्रम्)	.....।
21. जनाः शाकानि कुत्र क्रीणन्ति ?	(शाकापणः)	.....।

APSCERT

संस्कृत सप्तमी विभक्ति अभ्यासः

उदाहरणानुगुणं कोष्ठगतशब्दानां सप्तम्यन्तरूपैः रिक्तस्थानानि पूरयन्तु-



1.	जननी	.. पुत्रीषु ..... स्निह्यति ।	(पुत्र्यः)
2.	अध्यापकः	..... स्निह्यति ।	(छात्राः पुं०)
3.	भगिन्यः	..... स्निह्यति ।	(अनुजाः)
4.	रुग्णाः	..... विश्वासं कुर्वन्ति ।	(वैद्याः)
5.	गुहस्थः	..... विश्वासं करोति ।	(सेवकः)
5.	जनकः	..... विश्वासं करोति ।	(पुत्राः)
7.	अम्बायाः	..... प्रीतिः अस्ति ।	(पुत्रः)
8.	देशसेवकस्य	..... प्रीतिः अस्ति ।	(देशः)
9.	यतिवरस्य	..... प्रीतिः अस्ति ।	(ध्यानम्)
10.	राक्षसस्य	..... आसक्तिः ।	(स्वर्गः)
11.	मुनिवरस्य	..... आसक्तिः ।	(मोक्षः)
12.	दुर्जनस्य	..... आसक्तिः ।	(असदाचरणम्)
13.	तक्षकः	..... निपुणः ।	(तक्षणम्)
14.	योगिवरः	..... कुशलः ।	(योगः)
15.	पाचकः	..... निपुणः ।	(पाककार्यम्)
16.	भक्तानां	..... भक्तिः ।	(देवताः)
17.	सेविकानां	..... श्रद्धा अस्ति ।	(राज्ञी)
18.	जनकः	..... वात्सल्यं प्रदर्शयति ।	(सन्तानाः)
19.	प्रजानां	..... आदरः	(नृपाः)

APSCERT



७. परियोजनाकार्यम्

एषा कथा महाभारते अस्ति। महाभारतात् एतादृशीं मानवीयकथाम् एकां सङ्कलय्य आनयन्तु।



स्वीयमूल्याङ्कनम्



	आम्	न	किञ्चित्
१. पाठस्य कथां स्वीयवाक्यैः वक्तुं शक्नोमि ।			
२. कठिनपदानि वाक्येषु प्रयोक्तुं शक्नोमि ।			
३. नाडीजङ्घस्य स्वभावं लेखितुं शक्नोमि ।			
४. एतां कथां सम्भाषणरूपेण लेखितुं शक्नोमि।			




फलानि
आम्रम्
सेवफलम्
दाडिमम्
बीजपूरम्
नारङ्गम्
जम्बूफलम्
कदलीफलम्
द्राक्षागुच्छम्
नारिकेलम्
मधुकर्कटी
कालिङ्गम्
खर्बूजम्
बिल्वफलम्
स्वादुफलम्
लिचिका
खर्जूरम्
आमलकम्
इक्षुः
अनासफलम्
बदरीफलम्
कपित्थम्
शीताफलम्
चैरीफलम्
प्रबदरम्

8 भगवद्गीता

P2G5L3

अभ्यसनफलितानि

छात्राः व्यक्तित्वनिर्माणे भवग्दीतायाः प्राधान्यं ज्ञेयुः। C G - 1


श्लोकानां भावं वक्तुं समर्थाः भवेयुः। C G - 2

श्लोकानां कण्ठस्थीकरणे श्रद्धा वहेयुः। C G - 3

स्वीयवाक्यैः भावलेखने सामर्थ्यं प्राप्नुयुः। C G - 4

पाठेतर भगवद्गीता श्लोकानां भावलेखने समर्थाः भवेयुः। C G - 5

चित्रं पश्यन्तु, चिन्तयन्तु, वदन्तु।



१. चित्रे किं किं दृश्यते?

२. बालकः किं करोति?

३. भवान् कदापि स्पर्धासु भागं स्वीकृतवान् वा? कदा? कस्मिन् विषये?

पाठस्य चित्राणि पश्यन्तु। तानि उद्दिश्य वदन्तु।

(विजयः सप्तमकक्ष्याछात्रः। सः एकस्मिन् दिने विद्यालयस्य सूचनाफलके सूचनां पठति।)

विजयः - आचार्य ! नमस्कारः।

गुरुः - आयुष्मान् भव। आगच्छतु। उपविशतु।

विजयः - आचार्य! विद्यालयस्य सूचनाफलके वक्तृत्वस्पर्धाविषये सूचनां पठितवान्।


गुरुः - सत्यम्। व्यक्तित्वनिर्माणम् इति विषये भगवद्गीताश्लोकानाम् आधारेण वक्तृत्वस्पर्धा अस्ति।

विजयः - भवतः साहाय्येन अहं स्पर्धायां भागं ग्रहीतुम् इच्छामि।

गुरुः - अस्तु। अहं श्लोकान्, तेषां भावं च वदामि। अभ्यासं कृत्वा स्पर्धायां विजयं प्राप्नोतु।

विजयः - अस्तु ! आचार्य! वदन्तु।


गुरुः - **अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च।**
निर्ममो निरहङ्कारः समदुःखसुखः क्षमी ॥ १॥
सन्तुष्टस्सततं योगी यतात्मा दृढनिश्चयः।
मय्यर्पितमनोबुद्धिः यो मद्भक्तः स मे प्रियः॥ २॥



ఏ ప్రాణియందూ ద్వేషభావం లేనివాడు, సర్వప్రాణుల యందు, స్నేహం, దయ కలవాడు, మమకారం, అహంకారం లేనివాడు, సుఖ దుఃఖాలను సమానంగా అనుభవించేవాడు, క్షమాగుణం కలవాడు, అన్ని వేళలా సంతోషంతో ఉండువాడు, యోగి, నిగ్రహం కలవాడు, స్థిరమైన నిశ్చయం కలవాడు, మనస్సును, బుద్ధిని నా యందే నిలిపిన వాడు అయిన భక్తుడు నాకు ప్రియుడు.




यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः।
हर्षामर्षभयोद्वेगैः मुक्तो यस्स च मे प्रियः।। ३।।



ఎవరికీ ఉద్వేగం కలిగింపనివాడు, ఎవరి వల్లనూ తాను ఉద్వేగం పొందనివాడు, ఆనందం, ద్వేషం, భయం, చంచలం మున్నగు వికారాలు లేనివాడు నాకు ప్రియుడు.

समश्शत्रौ च मित्रे च तथा मानावमानयोः।
शीतोष्णसुखदुःखेषु समस्सङ्गविवर्जितः ।। ४।।
तुल्यनिन्दास्तुतिर्मौनी सन्तुष्टो येन केनचित्।
अनिकेतः स्थिरमतिः भक्तिमान् मे प्रियो नरः।। ५।।




శత్రువుల పట్ల, మిత్రుల పట్ల సమానమైన దృష్టి కలవాడు, మానావమానాలను, శీతోష్ణాలను, సుఖదుఃఖాలను ఒకే భావంతో చూసేవాడు, యెవరితోనూ ఎక్కువ అనుబంధం లేనివాడు, దొరికినదానితో తృప్తి చెందేవాడు, లౌకికమైన కోరికలు లేనివాడు. మౌనియై స్థిరనివాసం లేక (నిత్యము పర్యటిస్తూ) నిశ్చలచిత్తం గల భక్తుడు నాకు ప్రియుడు.

आयुस्सत्वबलारोग्य-सुखप्रीतिविवर्धनाः।
रस्याः स्निग्धाः स्थिरा हृद्या आहारास्सात्त्विकप्रियाः।। ६।।

ఆయువు, సత్వం, బలం, ఆరోగ్యం, సుఖం, ప్రీతి వీటిని పెంపొందించు రసపదార్థాలు, పాలు, చక్కెర, వెన్న, నెయ్యి మొదలగు స్నిగ్ధపదార్థాలు, ఓజస్సును పెంపొందించే స్థిరపదార్థాలు, సాత్వికభావాన్ని పెంచే హృద్యపదార్థాలు సాత్త్వికులకు ఇష్టం.


कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः।
आहारा राजसस्येष्टाः दुःखशोकामयप्रदाः।। ७।।

కారం, పులుపు, ఉప్పు రుచులు, మిక్కిలి వేడివైనవి, మాడినపదార్థాలు, దాహం కలిగించునవి, అలాగే దుఃఖం, చింత, రోగాలను కలిగించు ఆహారపదార్థాలు రాజసస్వభావం గలవారికి ఇష్టం.



यातयामं गतरसं पूतिपर्युषितं च यत्।
उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम्।। ८।।

ఒక జాము క్రితం వండినవి, సారహీనమైనవి, చెడువాసనగలవి, పాసిపోయినవి, ఎంగిలియైనవి, అపవిత్రమైనవి అయిన పదార్థాలు తామసులకు ఇష్టం.



